भैरवी :—हे देवी ! सुनो मैं नीलगङ्गा के पुण्य को बतलाता हूँ जिसको सुनने से मनुष्यों को अग्निष्टोम का फल प्राप्त होता है। हे सुन्दरी ! एक दिन क्रीडानिरत भगवान शिव ने पार्वती की आंखों का चुम्बन किया जिससे कि उस का मुख काले अञ्जन से भर गया। पार्वती ने काले अञ्जन से भरे हुए शिव के मुख को देखकर उसे निर्मल आईना दिखाया। हे शिवे ! फिर भगवान शंकर ने अपने मुख को काले अञ्जन से भरा हुआ देखकर गंगा के पानी से धो डाला। वही गंगा कृष्णवर्ण अञ्जन जैसी बन कर नीलगंगा के नाम से प्रसिद्ध हुई तथा यह नदी महा पापों का नाश करने वाली है।

नीलगङ्गाम्बसि स्नात्वा सर्वपापैःविमुच्यते ।
नीलगङ्गामृदं चापि यो दध्यादङ्गके स्वके ।।१६४।।
स याति ब्रह्म सदनं यत्र गत्वा न शोचते ।
इति ते कथितं देवि ! माहात्म्यममरोत्तमे ! ।।१६५।।
इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रुतश्च पठितश्चापि त्रिमलघ्नो प्रकीर्तितः ।।१६६।।

इति पञ्चमः परिच्छेदः।

भैरव :— शृणु देवि ! प्रवक्ष्यामि स्थाण्वाश्रमवनं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥१६७॥
पुरा चचार सुमहत्तपो हैमवते वने ।
गिरिशो दक्षतनुजाविश्लेषिततनुर्हरः ॥१६८॥
दिव्यंवर्ष सहस्रान्तं समाधिनिरतोऽभवत् ।
तत्रैव पार्वती देवी हरसेवार्थमागता ॥१६९॥
सेवापरा ह्यभूत्तत्र चिरं देवी महेश्वरी ।
स्थाणुवत्संस्थितो यत्र महेशस्तपसि स्थितः ॥१७०॥
स्थाण्वाश्रमस्ततः प्रोक्तो महापातकनाशनः ।
स्थाण्वाश्रमसमीपे तु यः स्नायात्सुरवन्दिते ! ॥१७१॥
स याति शिवसायुज्यं यत्र गत्वा न शोचते ।
स्थाण्वाश्रमे तु यो देवि ! श्राद्धं कुर्याद्विधानतः ॥
पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥१७२॥

नीलगङ्गा के पानी में स्नान करने से सब पापों से मुक्त हो जाता है। जो मनुष्य अपने अङ्गों पर नीलगङ्गा की मिट्टी मलता है वह सब शोकों से छूट कर परब्रह्म में लीन हो जाता है। हे देवों से भी मान्य देवी! इस प्रकार की महिमा मैंने तुम्हें सुनाई। कलियुग में भयङ्कर पापों का नाश करने वाला यह रहस्यमय पटल सुनने से या पढने से भी त्रिविध दुख (आध्यात्मिक-आधिदैविक-अधिभौतिक) का नाशक कहा गया है।

पञ्चम परिच्छेद समाप्त।

भैरव :—हे देवी! सुन अब मैं महान स्थाण्वाश्रमवन का वर्णन करता हूँ जिस को सुन कर मनुष्य करोडों महापापों से मुक्त होता है। पूर्वकाल में दक्ष की कन्या से वियुक्त होकर भगवान शंकर ने हिमालय पर कठिन तपस्या की। वह दिव्य मान से एक हजार वर्ष तक समाधि में लीन हुआ। फिर पार्वती देवी भी वहीं शंकर की सेवा के लिये आगई और वह महेश्वरी आकर चिर काल तक उसकी सेवा में निरत हुई। जिस कारण वहां

---

1. आजकल चन्दनवाडी कहा जाता है।

पर शंकर एक स्थाणु (ठूंठ) की तरह तपस्या में स्थिर था अतः उस महा पापों का नाश करने वाले स्थान को ही स्थाण्वाश्रम के नाम से पुकारा गया। हे देवताओं से वन्दनीया! जो मनुष्य स्थाण्वाश्रम के समीप स्नान करता है वह शिव के साथ एक होता है और उसे कोई शोक नहीं रहता है। हे देवी! जो मनुष्य स्थाण्वाश्रम में शास्त्रोक्त रीति से श्राद्ध करता है निसंदेह उसके पितर सौ कल्प तक तृप्त हो जाते हैं।

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः।
स्थाण्वाश्रमवने पुण्ये मुच्यते नात्र संशयः ॥१७३॥
गवां कोटिसहस्रस्य सम्यक् दत्तस्य यत्फलं।
तत्फलं कोटिगुणितं स्थाण्वाश्रमसमीपतः ॥१७४॥
कुरुक्षेत्रे प्रयागे च गंगासागरसंगमे।
स्नात्वा यत्फलमाप्नोति तत्स्थाणोर्दर्शनात्प्रिये ॥१७५॥
गा हिरण्यं चौमञ्च तिलप्रस्थं महेश्वरि!।
दत्त्वा स्थाणुवने देवि! परमं पुण्यमाप्नुयात् ॥१७६॥
स्थाण्वाश्रम[1]समीपे तु स्नात्वा पीत्वा च सुन्दरि!।
नरो न लिप्यते पापैः पद्मपत्रमिवाम्भसा ॥१७७॥
देवार्चनमत्र कुर्वन्तर्पणं च तथा प्रिये।
जपञ्च मुच्यते जन्तुर्महापातककोटिभिः ॥१७८॥
न करोति महास्नानं दानं वा जगदम्बिके।
स याति नरकान्घोराज्जन्मे जन्मे च पातकी ॥१७९॥
राक्षसाश्च पुरा देवदर्शनार्थमुपागताः।
देवैः सार्धञ्च मिलित्वा स्थाण्वाश्रमसमीपतः ॥१८०॥
अहं पूर्वमहं पूर्वमित्येवं स्पर्धया गिरा।
कलहञ्चक्रिरेऽन्योन्यं भुजाभुजि महेश्वरि! ॥१८१॥
गिर्यारोहणकाले तु दैत्याः पिष्टाः सुरोत्तमैः।
पिष्टा दैत्यास्तत्र गिरौ लीनास्तत्रैव सुन्दरि!॥
दैत्यान्पिष्टान्देवगणा वीक्ष्य हर्षमुपाययुः ॥१८२॥

1. ४ पंक्तियां क, ख, घ पु० अधिक पाठ।

निसंदेह भयङ्कर पापों से अथवा साधारण पापों से युक्त मनुष्य भी पवित्र स्थाएवाश्रम वन में मुक्त होता है। हजार करोड गायों के अच्छी तरह दान देने से जो फल मिलता है वही फल उससे भी करोड-गुणा स्थाएवाश्रम के समीप मिलता है। हे प्रिये ! कुरुक्षेत्र, प्रयाग, तथा गंगा समुद्र के संगम पर स्नान करने से जो फल मिलता है वही फल स्थाएवाश्रम के दर्शन से मिलता है। हे देवि ! गायें, सोना, रेशमी वस्त्र तथा सेर भर तिल स्थाणुवन में दान देने से अत्यन्त पुण्य मिलता है। हे सुन्दरी ! स्थाएवाश्रम के समीप स्नान करके अथवा जलपान करके मनुष्य उसी तरह पापों से लिप्त नहीं होता है जिस तरह कमल का पता जल से। हे प्रिये ! यहां पर देवपूजा, तर्पण और जप करना चाहिये ऐसा करने से मनुष्य करोडों महा पापों से छूट जाता है। हे जगत की माता ! जो मनुष्य यहां पर स्नान अथवा दान नहीं करता है वह जन्म जन्म का पापी बनकर घोर नरकों को जाता है।

प्राचीन काल में राक्षस लोग देवों के साथ मिलकर स्थाएवाश्रम के समीप भगवान के दर्शन के लिये आये। हे महेश्वरि ! उन लोगों ने 'मैं ही पहले मैं ही पहले' इस प्रकार स्पर्धा से कहते हुए आपस में लडाई और हाथापाई भी की। हे सुन्दरी ! पहाड पर चढने के समय देवता लोगों ने राक्षसों को पीस डाला और वह पिस कर उस पर्वत में ही लीन हो गये। देवता लोग राक्षसों को पिसा हुआ देखकर अत्यन्त प्रसन्न हुए।

यस्मिन्गिरौ दैवगणैर्दैत्या पिष्टाः समन्ततः।
स गिरिः परमोद्धारः पेषाख्यः प्रथितो भुवि ॥१८३॥
पिनष्टि यत्र पापानि नरो नियतमानसः।
ततः प्रोक्तः पुराविद्भिः पेषाख्यो गिरिसत्तमः ॥१८४॥
कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे।
स्नात्वा यत्फलमाप्नोति तस्यपेषस्य तु दर्शनाव ॥१८५॥
गिरावारोहणे देवि यावन्ता रेणुबिन्दवः।
तावन्ति बाजपेयानि प्राप्नोत्येव न संशयः ॥१८६॥

नैमिषे[1] च महाक्षेत्रे यत्फलं तत्समाप्यते ।
वाराणस्याश्चतुर्गुणं सहस्रं कुरुजांगलात् ॥१८७॥
लक्षं मानसक्षेत्रात्तु पेषाख्ये गिरिसत्तमे ।
आरोढु[2]मिच्छते यस्तु गिरिं देवि ! समाहितः ॥१८८॥
'श्रीश्रीश्रीशितिकण्ठेश !' इमं मन्त्रमनुस्मरेत् ।
स याति भवनं पुण्यं यत्र गत्वा न शोचते ॥१८९॥
विधिना यो नरो देवि ! पेषमारोहते नरः ।
पापसङ्घान् पिष्ट्वात्र पदं सादाशिवं व्रजेत् ॥१९०॥
पेषदर्शनमात्रेण नरो याति परं पदं ।
डाकिन्याद्याश्च[3] सर्वास्ता नाशमायान्ति तत्क्षणं ॥१९१॥

जिस पर्वत पर देवों ने चारों ओर से राक्षसों को पिस डाला वह पवित्र पर्वत पृथिवी पर पेष नाम से प्रख्यात हुआ । जहां पर संयमशील मनुष्य पापों को पीसता है, प्राचीन विद्वानों ने उस उत्तम पर्वत को पेष नाम दिया। कुरुक्षेत्र, प्रयाग, तथा गंगा सागर संगम पर स्नान करने से जो फल मिलता है वह पेष के दर्शन स मिलता है। हे देवि। पर्वत पर चढते समय जितने भी धूल के कण आते है उतने ही वाजपेय यज्ञों का फल मानव को मिलता है और साथ ही जो फल महातार्थ नैमिषारण्य की यात्रा स मिलता है वह भी यहां पर प्राप्त होता है। उत्तम पर्वत पेष पर काशी से चौगुणा, कुरुजांगल से हज़ार गुणा, और मानस तीर्थ से लाख गुणा फल मिलता है। हे देवी। जो मनुष्य पेष गिरि पर चढना चाहता है उस को 'श्रीश्रीश्रीशितिकण्ठेश' इस मन्त्र का स्मरण एकाग्र मन से करना चाहिये, ऐसा करने से वह उस स्थान को जाता है जहां कोई शोक नहीं। हे देवी ! जो मनुष्य शास्त्रोक्त विधि से पेष पर्वत पर चढता है वह इस संसार में पापों के समूहों को पीस कर सदाशिव पदवी प्राप्त कर लेता है। मनुष्य पेष के दर्शन मात्र से ही परम पद को प्राप्त कर लेता

1. १ पंक्ति क, ख, घ पु० अधिक पाठ।
2. २ पंक्तियां क, ग पु० अधिक पाठ।
3. १ पंक्ति ग पु० अधिक पाठ।

है और साथ हीं डाकिनी शाकिनी इत्यादि विरोधिनी शक्तियां भी तत्क्षण ही नष्ट हो जाती हैं।

नमस्करोति यो देवि ! पुण्यं पेषगिरिं नरः ।
स[1] याति परमं ब्रह्म यत्र गत्वा न शोचते ॥१६२॥
बहुनात्र किमुक्तेन कलौ पेषगिरिं नरः ।
आरुह्य मुक्तिमाप्नोति सत्यं सत्यं न संशयः ॥१६३॥
इति प्रोक्ता मया देवि ! पेषस्य महिमा परा ।
श्रुतानुध्याता पठिता महापातकनाशिनी ॥१६४॥
इत्येष पटलो गुह्यो प्रोक्तस्तव वरानने ! ।
श्रुतश्च[2] पठितश्चापि ह्यमेधादियागदः ॥१६५॥

इति षष्ठः परिच्छेदः ।

भैरवी :— श्रुत्वा भवन्मुखादेव महिमानमनुत्तमं ।
नगस्य पेषिताख्यस्य दैत्यास्थिप्रभवस्य च ॥१६६॥
कृतार्थास्मि कृतार्थास्मि कृतार्थास्मि न संशयः ।
अधुना श्रोतुमिच्छामि नागस्यापि महेश्वर ! ॥१६७॥
प्रभावञ्च समुत्पत्तिं कथयस्व प्रसादतः ।
भैरवः :— शृणु सुश्रोणि ! वक्ष्यामि शेषस्य नागरूपिणः ॥१६८॥
माहात्म्यञ्च प्रभूतिञ्च सर्वपापप्रणाशिनीं ।
पुरा कृतयुगे देवि ! स्थानं चक्रे हिमालये ॥१६९॥
शिखरे वै महापुण्ये चामरेश्वरसन्निधौ ।
पूजार्थं संयमार्थञ्च तपोऽर्थं सुरसुन्दरि ! ॥
देवतासिद्धगन्धर्वयक्षजातिसमन्वितः ॥२००॥

हे देवी ! जो पवित्र पेषगिरि को प्रणाम करता है वह शोक रहित होकर परब्रह्म में लय होता है। इस विषय में बहुत कहने से क्या, यह बात तो निसंदेह सत्य है कि कलियुग में मनुष्य पेषगिरि पर चढने से

---

1. २ पंक्तियां क, ख, घ पु० अधिक पाठ। 2. १ पंक्ति क, ख, घ पु० अधिक पाठ।

मुक्ति प्राप्त कर लेता है। हे देवि ! इस प्रकार मैंने पेष की पवित्र महिमा का वर्णन किया। यह तो श्रवण, मनन अथवा पठन से ही महापापों का नाश करने वाली है। हे सुन्दर मुखी ! मैंने तुझे यह रहस्यमय पटल सुनाया यह तो श्रवण अथवा पठन से अश्वमेधादि यज्ञों का फल देता है।

छटा परिच्छेद समाप्त।

भैरवी :—हे देव आपके मुख से, राक्षसों की हड्डियों से बने हुए पेषगिरि का माहात्म्य सुन कर मैं निसंदेह कृतार्थ हो गई हूँ। हे महेश्वर ! अब में शेषनाग की उत्पत्ति और प्रभाव सुनना चाहती हूँ कृपा करके मुझे कहिये।

भैरव :—हे पतली कमर वाली ! सुन मैं सर्परूप धारी शेष की महिमा और उत्पति का वर्णन करता हूँ जो कि सब पापों का नाश करने वाली है। हे देवि ! पूर्वकाल सत्ययुग के जमाने में (भगवान ने) अमरेश्वर के समीप ही हिमालय के उच्च शिखर पर पूजा, संयम तथा तपस्या के लिये अपना स्थान बनाया। हे सुन्दरी ! देवता, सिद्ध तथा यक्ष जाति के लोग भी वहीं पर आकर रहने लगे।

एतस्मिन्नन्तरे कश्चिद्वातरूपधरो बली।
दैत्येन्द्रोऽभून्महावीर्यस्तपोगर्वेण गर्वितः ॥२०१॥
अत्रस्थान्संग्रहान्देवानीरयामास शक्तितः।
देवाः सह महेन्द्रेण शरणं परमेश्वरं ॥२०२॥
निकटस्थं समाजग्मुः स्तुतिभिः पर्यतोषयन्।

देवा ऊचुः– नमस्ते देवदेवाय शम्भवे परमात्मने ॥२०३॥
जगत्स्थितिविनाशानां हेतुभूताय वै नमः।
त्वं माता सर्वभूतानां त्वमेव जगतां पिता ॥२०४॥
त्वं सुहृद्बन्धुरेवासि त्वत्तो नान्यज्जगत्त्रये।
अनाथानां तु नाथस्त्वमगतीनां गतिर्भव ॥२०५॥
आर्तानामार्तिहा त्वं वै त्वमेव शरणंविभो !।
इति स्तुत्या महादेवः प्रादुरासीद्दयानिधिः ॥२०६॥

उवाच श्लक्ष्णया वाचा देवानां सौख्यभाजनं ।
सर्वं श्रुतं मया देवा दैत्येन्द्रस्य दुरात्मनः ॥२०७॥
मया संवर्धितो दैत्यच्छेतुं नार्हा सुराधिपाः ।
तस्माद्व्रजध्वं शरणं शरणार्तिप्रणाशनम् ॥२०८॥
भगवन्तं चतुर्बाहुं शङ्खचक्रगदाधरं ।
क्षीरसागरमध्यस्थं शेषशायिनमेवच ॥२०९॥
इतिविसृज्य तान्देवानन्तर्धिं प्राप्तवान्हरः ।
तत्तो देवगणाः सर्वे हर्षसम्पूर्णमानसाः ॥
क्षीराब्धिं प्राप्य संतुष्टास्तुष्टुवु जगतां पतिं ॥२१०॥

इसी समय में कोई अत्यन्त बलशाली, तपस्या के बल पर घमण्डी, वायु के रूप वाला राक्षस भी विद्यमान था। वह यहां पर ठहरे हुए देवताओं को समग्र ग्रहमण्डल के साथ ही कंपित करने लगा। देवता लोग अपने राजा इन्द्र के साथ समीपवर्ती भगवान की शरण में आये और उसे स्तुतियों से प्रसन्न किया।

देवता बोले :—देवों के देव, परमात्मरूप, जगत की स्थिति तथा नाश के मूलकारण शिव तुम्हें प्रणाम हो। तुम सब जीवों के माता, तुम जगत के पिता तथा तुम्ही मित्र और बान्धव भी हो। तीनों लोकों में भी तुम से बढ़ कर और कुछ नहीं है। तुम तो अनाथों के स्वामी हो ही अतः हम शरणार्थियों के शरण बनो, तुम दुखियों के दुखों को हरने वाले हो और हे भगवान् ! तुम्ही शरण देने वाले हो। इस प्रकार की स्तुति से वह दया का समुद्र भगवान शंकर प्रत्यक्ष होकर मधुर वाणी से, देवताओं को सुख देने वाले वचन कहने लगा। हे देवता लोगो ! मैंने उस दुष्ट राक्षस की सारी बातें सुन ली हैं परन्तु मैंने ही उसे बढ़ाया है अतः मैं ही उसका नाश नहीं कर सकता हूँ। इसलिये आप लोगों को, शरण में आये हुओं के दुखहर्ता, क्षीरसागर में रहने वाले, शेषनाग पर सोये हुए, शंख, चक्र, गदाधारी चतुर्बाहु नारायण की शरण में जाना चाहिये। भगवान शंकर उन्हें इस प्रकार बिदा देकर स्वयं अन्तर्ध्यान हुए। अनन्तर सारे देवता हर्ष भरे मन वाले क्षीर समुद्र में पहुँच कर जगत्पति विष्णु की स्तुति करने लगे।

देवा :— नमो नमो ह्यनन्ताय रूपातीताय वै नमः ।
नमः सर्वस्वरूपाय सर्वातीताय वै नमः ॥२११॥
गुणेशाय गुणज्ञाय गुणातीताय वै नमः ।
सर्वेशाय च सर्वाय सर्वगाय च ते नमः ॥२१२॥
वेद्याय वेद्यरूपाय वेदगम्याय ते नमः ।
ध्यानाय ध्यानगम्याय ध्यानातीताय वै नमः ॥२१३॥
जगत्कर्त्रे नमस्तुभ्यं जगद्धर्त्रे च वै नमः ।
जगत्पालनसंसक्तचित्ताय चित्स्वरूपिणे ॥२१४॥
इति स्तुत्या तु देवेशि ! प्रसन्नोऽभूद्दयापरः ।
उवाच वचनं देवान् सर्वदुःखनिवारणम् ॥२१५॥
गच्छध्वं देवदेवेशाःनाकं शोकहरं परं ।
तं दुष्टं सकुलं हन्मि वातरूपं दुरासदम् ॥२१६॥
इत्युक्त्वान्तर्दधे विष्णुर्भक्तानामार्तिनाशनः ।
पातालाद्गिरिजे देवि ! प्रादुर्भूतो जगत्प्रभुः ॥२१७॥
शेषारूढश्चतुर्बाहुः सलक्ष्मीकोऽपि सायुधः ।
आज्ञापयामास तदा शेषं शतफणान्वितं ॥२१८॥
वातं पिब फणीन्द्र ! त्वं सहस्र वदनैस्तथा ।
प्राणां[1]स्तर्पय नागेश यतस्त्वं पवनाशनः ॥२१९॥
एवं श्रुत्वा भगवतो वचनामृतमुत्तमं ।
प्रादुर्भूतश्च तं दैत्यं वायुरूपं पपौ क्षणात् ॥२२०॥
पुनर्वातस्य शेषो वै नाभवद्गिरिमस्तके ।
पुनश्च वसतिश्चक्रे पन्नगो परमे वने ॥
तदा प्रभृति ते देवा निर्विघ्नासन् शिवे सदा ! ॥२२१॥

अनन्त तथा रूपादि से रहित भगवान को प्रणाम हो। सब स्वरूपों में व्याप्त तथा सब से परे नारायण को प्रणाम हो। गुणों के स्वामी, गुणों को जानने वाले तथा गुणों से परे विष्णु को प्रणाम हो। सबों के स्वामी, समग्र, तथा सर्वव्यापी भगवान तुझे प्रणाम हो। ज्ञेयपदार्थ, ज्ञेयरूप, तथा

1. १ पंक्ति क, ख, घ पु० अधिक पाठ।

वेदों से ज्ञेय भगवान तुझे प्रणाम हो। ध्यानरूप, ध्यान से ही ज्ञेय तथा ध्यान से बाह्य भगवान को प्रणाम हो। हे जगत् के कर्ता, जगत के हर्ता, जगत के पालन की ओर लगे हुए मनवाले चित्स्वरूप! भगवान तुझे प्रणाम हो। हे देवेशि! इस प्रकार की स्तुति से वह दयालु प्रसन्न होकर देवों के दुखों को हरने वाले वचन कहने लगा। हे देवाधिदेवो! तुम शोक रहित स्वर्गधाम में चले जावो। मैं उस उद्दण्ड वायुरूपधारी राक्षस को कुल के सहित नष्ट करूंगा। भक्तों के दुखों को हरण करने वाला भगवान यह कह कर अन्तर्ध्यान हुआ और हे पर्वतपुत्री! अनन्तर वह चतुर्बाहु, जगत् का स्वामी फिर भी लक्ष्मी के साथ आयुध धारण करके शेषनाग पर चढ कर पाताल से प्रकट हुआ। अनन्तर उसने सौ फणों वाले शेषनाग को आज्ञा दी कि हे सर्पराज! तुम तो पवनाशी हो अतः तुम हजारों मुखों से पवन का पान करो। शेष ने भगवान के अमृतमय वचन सुनते ही उस वायुरूपधारी राक्षस को क्षणमात्र में में पीलिया ताकि पहाड की चोटी पर फिर वायु का शेष भी नहीं रहा। अनन्तर वह सर्प भी एक घने वन में रहने लगा और उस दिन से ले कर देवता लोग निर्विघ्न हो गये।

पुनः प्रोवाच भगवान् शेषञ्च पवनाशिनं।
अत्र तिष्ठ फणीन्द्र! त्वं भयं नाशय वातजम् ॥२२२॥
तदाप्रभृति देवेशि! नागोऽभूच्छेषसंज्ञितः।
सुश्रमोऽप्यभिधो नागो वर्णितो योगिसत्तमैः ॥२२३॥
सुखेनात्र[1] स्तुतो लोकस्तस्मान्नागोऽपि सुश्रमः।
स्वाश्रमोऽपि बुधैः प्रोक्तो नागराजो नु सुन्दरि! ॥२२४॥
यस्मात्सुखेन लब्धो वै स्वाश्रमं त्रिदिवौकसैः।
अत्र दर्शनमात्रेण मुच्यते पापराशिकृत् ॥२२५॥
[2]दर्शनात्स्पर्शनात्स्नानात् दानाद्धोमाज्जपात्तथा।
स्वाध्यायस्तुतिपाठाच्च ह्यनन्तं पुण्यमाप्नुयात् ॥२२६॥
महागोनस[3] नामानमारुहेत्पर्वतोत्तमं।
यत्रारोहणमात्रेण न गच्छेद्यममन्दिरम् ॥२२७॥

1. ३ पंक्तियां क, ख, घ पु० अधिक पाठ। 2. २ पंक्तियां क, ख, घ पु० अधिक पाठ। 3. आधुनिक महागुनस।

सप्तमः परिच्छेदः ।

भैरवी :— सुश्रुमस्तु महादेव ! श्रुतो भवदनुग्रहात् ।
अधुना श्रोतुमिच्छामि तीर्थं वै वायु[1]वर्जनम् ॥२२८॥
किमुक्तं मठिकास्तत्र कुर्वते प्रस्तरैः शुभैः ।
वद मे कृपया शम्भो ! तत्र तीर्थे च किं फलम् ॥२२९॥

भैरव :— फिर भगवान ने पवनभक्षी शेष से कहा,—कि हे सर्पराज ! तुम यहीं पर रह कर वायु से उत्पन्न होने वाले भय का नाश करते रहो। हे देवेशि ! उस दिन से लेकर वहां पर शेष नाम वाला नाग बन गया। उत्तम योगियों ने इसी का नाम सुश्रुम भी रखा है। सुश्रुम इसको इसलिये कहते हैं कि यहां पर सारे जीव सुख से पूर्ण हो जाते हैं। अथवा इसको स्वाश्रम भी कहा जाता है क्योंकि इसी नागराज की सहायता से देवताओं ने सुखपूर्वक अपने आश्रम प्राप्त किये। इसके दर्शनमात्र से ही पापी मनुष्य भी छूट जाता है। यहां पर दर्शन, स्पर्श, स्नान, दान, हवन, जप, स्वध्याय, तथा स्तुतिपाठ से अनन्त पुण्य मिलता है। अनन्तर मनुष्य महोगोनस नाम वाले उत्तम पर्वत पर चढे क्योंकि इस पर्वत पर चढने से कभी भी यम का दरवाजा देखना नहीं पडता है।

सप्तम परिच्छेद समाप्त हुआ ।

भैरवी :—हे महादेव ! आपके अनुग्रह से मैंने सुश्रुम का वृत्तान्त सुन लिया। अब मैं वायुवर्जन तीर्थ का वृत्तान्त सुनना चाहती हूँ। हे शम्भू ! आपने क्या कहा था कि वहां अच्छे पत्थरों से छोटे २ मठ बनाये जाते हैं तथा साथ ही कृपया यह भी कहिये कि उस तीर्थ पर क्या फल मिलता है ?

शृणु देवि ! प्रवक्ष्यामि मठदानंविधिं शुभां ।
मठदानात्परं नास्ति ह्यन्यदानं सुरार्चिते ! ॥२३०॥
मठान्हि प्रस्तरैः कृत्वा श्रेष्ठैः स्थूलैश्च शोभनैः ।
साङ्गनैर्गृहसम्भारैर्वासोभिः समलङ्कृतैः ॥२३१॥
विधिवत्पूजनं कुर्यात्गृहाणां तत्र पार्वति !

---

1. आधुनिक वावजन।

यथा विभवद्रव्येण ब्राह्मणाय निवेदयेत् ॥२३२॥
मठदानं कृतं यैस्तु तत्र पर्वतसप्तके ।
ते यान्ति शिवसदनं यावदिन्द्राश्चतुर्दश ॥२३३॥
देवैश्च पिष्ठान् दैत्यांस्तु पृषितो नाम दानवः ।
श्रुत्वा समीरणो भूत्वा बबाधे देवतांस्तदा ॥२३४॥
वायुना परिभूतास्तु देवास्ते शरणं गताः ।
देवदेवं महादेवं तुष्टुवुः परया गिरा ॥२३५॥

देवा :— नमो देवाधिदेवाय शर्वाय शम्भवे भवे ।
आदिमध्यान्तशून्याय पराय प्रभवे नमः ॥२३६॥
नमो भैरवरूपायापमृत्युविनाशिने ।
[1]कलानिधिविभूषाय कालरूपाय ते नमः ॥२३७॥
श्वेतशान्ताय देवाय भीमाय भवनाशिने ।
भयानकाय देवाय मुञ्जमेखलिने नमः ॥२३८॥
नमोऽमृतस्वरूपाय शान्तरूपाय ते नमः ।
अमरेशाय देवाय भूयो भूयो नमाम्यहम् ॥२३९॥

हे देवि ! सुन मैं तुम्हें मठदान की पवित्र विधि कहता हूँ क्योंकि हे देवपूजिते ! मठदान से बढ कर और कोई दान नहीं है । हे पार्वती ! अच्छे मोटे तथा सुन्दर पत्थरों से मठ बना कर उन्हें आङ्गनों से, घर की सामग्रियों से तथा वस्त्रों से सजाना चाहिये । फिर शास्त्रोक्त विधि से उन की पूजा करके यथासम्भव धन के साथ ब्राह्मणों को दान में देना चाहिये । उन सात पर्वतों की (मध्यवर्ती अधित्यका पर) जिन्होंने मठदान किया वह उतने समय तक शिवलोक में जाते हैं जितने समय तक चौदह इन्द्रों की स्थिति है । इसी दौर में पृषित नामक राक्षस ने देवताओं द्वारा (पेषगिरि पर) राक्षसों का पीसा जाना सुन कर वायु का रूप धारण करके देवताओं को सताना आरम्भ किया । वह देवता लोग वायु से अनादृत होकर देवों के देव शंकर की शरण में आकर, उत्कृष्ट वाणी से उसकी स्तुति करने लगे ।

देवता :—देवों के नायक, मङ्गलस्वरूप, कल्याण के उत्पत्तिस्थान, संसार के

---

1 २ पंक्तियां क, ख, घ पु० अधिक पाठ ।

दुखों का दलन करने वाले, आदि, मध्य तथा अन्त से हीन, परदेवता को प्रणाम हो। भैरव रूप धारण कर अकालमृत्यु का नाश करने वाले, चन्द्रकला से अलंकृत, कालस्वरूप भगवान को प्रणाम हो। निर्मल, शान्त, देवस्वरूप, उग्ररूप, भवबन्धन तोडने वाले, भयानक देवता, तथा मुञ्ज घास की तागडी लगाये हुए शंकर को प्रणाम हो। हे अमृत स्वरूप, शान्तात्मा अमरेश देव! मैं आपको बार २ प्रणाम करता हूँ।

इति श्रुत्वा नुतिं प्रीतः कृतां परमदैवतैः।
जगाद भगवान्भूयो देवान्परमया मुदा ॥२४०॥
भैरवः :— श्रुतं मया पूर्वमेव बाधनं दानवस्य हि।
अत्रैव मठिकां कृत्वा तिष्ठध्वमविशङ्कया ॥२४१॥
मठिकासु च देवेशाः कुरुध्वं वायुवर्जनं।
इत्थं कृत्वा ततो देवा मठिकास्तत्र प्रस्तरैः ॥२४२॥
स्थिता तत्रैव देवेशि! मठिकासु सुविस्मिताः।
वायुः शशाम सुमहान् दैत्यः परमदारुणः ॥२४३॥
दर्शयामास तदुग्रं रूपं दैत्यः पुरन्दरं।
दृष्ट्वा दैत्यमुग्ररूपं इन्द्रो वज्रं समादधे ॥२४४॥
अहनद्दानवं देवस्तत्रैव वायुवर्जने।
यस्माच्छशाम सुमहान्वायुरूपश्च दानवः ॥२४५॥
तस्मात्प्रोक्तं पुराविद्भिस्तीर्थं वै वायुवर्जनम्।
स्नानं दानमर्चनञ्च कृत्वा वै वायुवर्जने ॥२४६॥
अनन्तं पुण्यमाप्नोति सत्यं सत्यं वरानने।
मठिकां[1] ये न कुर्वन्ति तत्रैव वायुवर्जने ॥२४७॥
दारुणं नरकं यान्ति शतकल्पं न संशयः।
यो न कुर्यान्महादेवि! स्नानं दानं जपं हविः ॥२४८॥
स याति नरकं घोरं तत्तीर्थं तस्य निष्फलं।
श्रुत्वा पठित्वा मुच्येत महापातकपञ्जरात् ॥२४९॥

उत्तम देवताओं द्वारा की हुई स्तुति से भगवान प्रसन्न होकर उनसे कहने लगे :—

1. २ पंक्तियां क, ख, घ पु० अधिक पाठ।

भैरव :—मैंने राक्षस की पीडाओं को पहिले ही सुन लिया है अतः हे देवो ! तुम यहीं पर मठिकायें बना कर निश्शंक मन से रहो और उन्हीं में अपने आप को वायु से बचाओ। हे देवेशि ! इस प्रकार देवता लोग वहां पत्थरों से मठ बनाकर विस्मयपूर्वक उन में निवास करने लगे। अत्यन्त भयावह वायुरूपवाली धारी राक्षस का उपद्रव शान्त हो गया परन्तु उस राक्षस ने अपना वही भयानक रूप इन्द्र को दिखाया। इन्द्र ने उस राक्षस के भयावह रूप को देख कर वज्र हाथ में उठाया और उसे वहीं वायुवर्जन के स्थान पर मार डाला। जिस कारण इस स्थान पर वायुरूपधारी भयङ्कर राक्षस मौत के घाट उतारा गया अतः प्राचीन विद्वानों ने इस तीर्थ का नाम वायुवर्जन रखा। मनुष्य वायुवर्जन में स्नान, दान तथा पूजा करने से अनन्त पुण्य प्राप्त कर लेता है। हे सुन्दर मुखी ! यह सत्य है जो लोग वायु-वर्जन में मठिकायें नहीं बनाते हैं वह निसंदेह सौ कल्पों तक कठिन नरकों को जाते हैं। जो मनुष्य यहां पर स्नान, दान, जप हवन नहीं करता है हे देवी ! वह घोर नरक को जाता है और उसका इस तीर्थ पर आना ही व्यर्थ है। हे देवि ! इस प्रकार मैंने वायुवर्जन तीर्थ का वर्णन तुम्हें सुनाया इसके श्रवण अथवा पठन से मनुष्य बडे पापों के पिञ्जरे से मुक्त होता है।

भैरवी :— वद सत्यं महादेव शुष्कं[1] वै सर उत्तमं।
सरोवरमभूदेव शुष्कीभूतं कथं किल ? ॥२५०॥
श्रृणु सुश्रोणि ! वक्ष्येऽहं शुष्कीभूतं सरोवरं।
येन विज्ञातमात्रेण नरो मुच्येत संशयात् ॥२५१॥
हतशेषाणि रक्षांसि तिरोभूतानि वै हृदि।
तस्मिन्नेव पुरा देवि ! देवांस्ते च बबाधिरे ॥२५२॥
कुर्वन्तो मुनिसङ्घानां विघ्नांश्चैव समन्ततः।
एकदा तत्र तौ देवि ! स्वेच्छया ह्यागतौ तदा ॥२५३॥
वीक्ष्य प्रबाधितांस्देवान् राक्षसैः परमेश्वरौ।
तत्र परमकारुण्याद्देवी देवमुवाच ह ॥२५४॥
दयालो परमेशान ! पश्यैतान्मुनिसत्तमान्।
विघ्नितात्राक्षसौघैर्हि पीडितानपि शङ्कर ! ॥२५५॥

1. आधुनिक होखसर।

श्रुत्वा देवीवचः सोऽपि हूङ्कारमकरोत्तदा ।
हूङ्काराभिहता दैत्या मग्नास्ते तु सरोवरे ।।२५६।।
मग्नान्दृष्ट्वा तत्तो देवि शशाप सर उत्तमं ।
मुनिविघ्नकरान्यस्माद्राक्षसान्दैत्यदानवान् ? ।।२५७।।
शुष्कीभव सरस्तस्माद्धव्यकव्यविवर्जितः ।
इति शापेन तद्दिव्यं सरः शुष्कमभूत्किल ।।२५८।।
शुष्कीभूताच्च सरसो निर्गता रक्षसां गणाः ।
नाशयामास स्वगणैः पाशमुद्गरपाणिभिः ।।२५९।।
तदा प्रभृति देवेशि ! नष्टं शुष्कं सरोऽभवत् ।
शेषो[1] रक्षोगणो यस्माद्याति विघ्नकरः प्रिये ! ।।
तस्मान्मौनेन प्रचलेत्तत्स्थानाज्जदम्बिके ! ।।२६०।।

हे महादेव ! अब आप उत्तम शुष्क सर के विषय में कहिये अर्थात् किस प्रकार वह सरोवर सूख गया था । हे पतली कमर वाली ! सुनो अब मैं शुष्क सर का वर्णन करता हूँ, जिसको जानने से मनुष्य के सब संशय दूर हो जाते हैं । हे देवी ! मर कर बचे हुए राक्षस प्राचीन काल में उसी सरोवर में छिप कर देवताओं को सताने लगे और चारों ओर से मुनियों के समूहों पर विघ्न डालने लगे । एक दिन राक्षसों से सताये जाने वाले देवताओं को देखकर वह शिव तथा पार्वती दोनों स्वेच्छा से उधर आ निकले । वहां अत्यन्त दयाशील देवी शंकर से बोली कि हे देव ! राक्षसों के झुण्ड से सताये जाने वाले इन उत्तम मुनियों की ओर तो देखिये । देवी के वचन सुन कर शिव ने एक हूङ्कार किया जिस से वह राक्षस परास्त होकर सरोवर में मग्न हो गये । अनन्तर सर में डूबे हुए राक्षसों को देख कर देवी ने उस उत्तम सर को शाप दिया कि हे सरोवर जिस कारण मुनियों पर विघ्न डालने वाले राक्षस दैत्य दानवों को तुमने छिपाया है ? अतः तुम हव्य तथा कव्य से हीन होकर सूख जावो । सूखे हुए सर

? वाक्य असम्पूर्ण सा लगता है । मूल पुस्तकों का गम्भीर अध्ययन करने पर भी पाठ में कोई हेर फेर न हो सका अतः अनुवाद करते समय कल्पना से काम लिया गया । 1. २ पंक्तियां क, ख, घ पु० अधिक पाठ ।

से राक्षसों का समूह बाहिर निकल आया और शंकर ने पाश मुद्गर इत्यादि अस्त्रों को धारण करने वाले शिवगणों के द्वारा उनका नाश करवाया। हे देवी! उसी दिन से वह सर सूख कर नष्ट हो गया। हे प्यारी! बचे खुचे राक्षस अब भी वहां से चलने वालों पर विघ्न डालते हैं अतः उस स्थान से मौन धारण करके सरकना चाहिये।

भैरवी :— वद सत्यं महादेव! पुण्यां पञ्चतरङ्गिणीं।
यां दृष्ट्वा मुच्यते जन्तुर्जन्मान्तरभवैरघैः ॥२६१॥
पुण्यमक्षयमाप्नोति यत्र स्नानान्महेश्वर!।
दानाद्यत्र महेशान! फलमाप्नोति यागजम् ॥२६२॥

भैरव :— शृणु सुन्दरि! वक्ष्येऽहं पुण्यां पञ्चतरङ्गिणीं।
यां स्नात्वा पुण्यमाप्नोति हयमेधादिकं प्रिये! ॥२६३॥
पुरा ताण्डवलग्नस्य नृत्यमानस्य धूर्जटेः।
कपर्दः शिथिलो भूतः पञ्चधा हि महेश्वरि! ॥२६४॥
ततो वै पञ्चधा देवि! प्रादुर्भूता कपर्दतः।
गङ्गा भगवती देवी महापातक नाशिनी ॥२६५॥
या पञ्चधा महेशानि! कपर्दान्निसृता नदी।
सैव प्रोक्ता पुराविद्भिर्नदी पञ्चतरङ्गिणी ॥२६६॥
कुरुक्षेत्रे प्रयागे च गङ्गायां यत्फलं लभेत्।
तत्फलं समवाप्नोति स्नात्वा पञ्चतरङ्गिणीम् ॥२६७॥
गा[1] हिरण्यं सुवासांसि क्षौमं चन्दनमेव च।
कुङ्कुमागुरुकर्पूरमृगनाभिमपीश्वरि! ॥२६८॥
यो ददाति द्विजश्रेष्ठो शैवं पदमवाप्नुयात्।
[2]आरुहेद्रत्नशिखरं ततो डामरकं व्रजेत् ॥२६९॥

---

1 २ पंक्तियां क, ख, पु० अधिक पाठ। 2. आधुनिक 'भैरव बाल' दस बीस वर्ष से तो इस रास्ते से यात्रियों का जाना काश्मीर राज्य ने बन्द किया है क्योंकि कहा जाता है कि उन दिनों कई संन्यासी रत्नशिखर की चोटी से अपने आप को गिरा कर मारते थे और अपने आपको शिव के अर्पण करते थे। इस प्रकार एक बड़े जन-समुदाय का व्यर्थ हत्याकाण्ड होता था।

दृष्ट्वा डामरकं तत्र शिलीभूतं महागणं ।
पुण्यमाप्नोति मनुजो अश्वमेधादियागजम् ॥२७०॥

इत्यष्टमः परिच्छेदः ।

भैरवी :—हे महादेव ! पवित्र पञ्चतरङ्गिणी नदी का सच्चा वृत्तान्त बताइये जिसको सुनकर मनुष्य जन्म जन्म के पापों से मुक्त होता है, और हे महेश्वर ! जहां पर स्नान करने से अक्षय पुण्य तदा दान देने से यज्ञ करने का फल मिलता है ।

भैरव :—हे सुन्दरी ! सुन मैं पवित्र पञ्चतरङ्गिणी का वर्णन सुनाता हूँ जहां स्नान करने से अश्वमेध इत्यादि यज्ञों का फल मिलता है । हे महेश्वरी ! प्राचीनकाल में ताण्डव में निरत शिव का जटाजूट नर्तन करते समय पांच भागों में बिखर गया । हे देवी ! उस कपर्द के पांचों भागों से महा पापों को नाश करने वाली गङ्गा भगवती बह चली । हे महेश्वरि ! जो नदी कपर्द के पांच शाखाओं में बह चली उसी का प्राचीन विद्वानों ने पञ्चतरङ्गिणी यह नामकरण किया । कुरुक्षेत्र, प्रयाग और गङ्गा में जो फल प्राप्त होता है वही फल पञ्चतरङ्गिणी में स्नान करने से मिलता है । जो ब्राह्मण गाय, सोना, अच्छे वस्त्र, रेशम, चन्दन, केसर, अगरु, कपूर, नाफा इत्यादि द्रव्य यहां पर दान देता है उसे शिव पद प्राप्त होता है । फिर रत्नशिखर पर चढ़ कर डामरक के पास जाना चाहिये । डामरक वास्तव में एक प्रधान शिवगण पत्थर के रूप में परिणत हुआ है । उसके दर्शन से मनुष्य को अश्वमेधादि यज्ञों से उत्पन्न होने वाला फल मिलता है ।

अष्टम परिच्छेद समाप्त हुआ ।

भैरवी :— कोऽसौ डामरको नाम भवता कथितस्तु यः ।
गणः कथं शिलीभूतो वद सत्यं महेश्वर ! ॥२७१॥

भैरव :— शृणु वक्ष्ये महेशानि गणं डामरकाभिधं ।
येन कर्मविपाकेन शिलीभूतो गणेश्वरः-॥२७२॥
पुरा नर्तनशीलस्य धूर्जटेः सन्ध्ययोर्द्वयोः ।
षण्मुखं क्रीडयानस्य सन्ध्याकालोऽत्यगात्प्रिये ॥२७३॥

सध्यातिवाहनात्तस्य चिन्ता मनसि चाभवत् ।
चिन्तमानस्य तस्यैवं देवी पृष्टवती मुहः ॥२७४॥
किमिदं चिन्तसे देव ! का चिन्ता भगवंस्तव ।
वद सत्यं महादेव मनो मे शर्म नाश्नुते ॥२७५॥
इति श्रुत्वा वचो देव्यास्तस्याः प्रियचिकीर्षया ।
प्रावदत् भगवान्देवीं सन्ध्याकालोऽत्यगान्मम ॥२७६॥
सन्ध्यालोपान्मया प्राप्ता चिन्ता च महती प्रिये ! ।
इति श्रुत्वा वचस्तस्य देवदेवस्य धूर्जटेः ॥२७७॥
प्रत्युवाच पुनर्देवी भगवन्तं सनातनं ।
अयं महागणो देव ! डामरं गृह्य तिष्ठतु ॥२७८॥
सन्ध्याया वेदनार्थञ्च चिरकालं महेश्वर ! ।
इति श्रुत्वा वचो देव्यास्तथेत्युक्त्वा महेश्वरः ॥२७९॥
हर्षयन् षण्मुखं तत्र पुनर्देव्याः सहालपत् ।
तदा प्रभृति देवेशि ! महाडामरको गणः ॥२८०॥
तस्थौ सन्ध्यावेदनार्थं भवस्य सुरपूजितः ।
एकदा क्रीडमानस्य शिवस्य तनुजं स्वकम् ॥२८१॥
गणः प्रमादनिद्रायां लीनोऽभूद्वरवर्णिनि ! ।
संध्याकालो पुनस्तस्य व्यत्यगाच्च कपर्दिनः ॥२८२॥

भैरवी :—हे महेश्वर ! आपने जिस डामरक के विषय में कहा वह कौन व्यक्ति था और किस प्रकार पत्थर बन गया ।

भैरव :—हे महेश्वरी ! सुनो मैं डामरक का वृत्तान्त कहता हूँ कि किस दुष्कर्म के कारण वह पत्थर बन गया । हे प्रिये ! प्राचीनकाल में दो संध्याओं के समय ताण्डव करने वाले शंकर का कुमार जी के साथ खेलने में निरत होने के कारण संध्याकाल ही ढल गया । संध्या के ढल जाने से उसके मन में चिन्ता हुई और उसको चिन्तित मुद्रा में देख कर देवी बार २ पूछने लगी । "हे भगवान् ! आप क्या सोचते हैं ? आपको कौनसी चिन्ता है ? आप सच्ची बात बताइये क्योंकि मेरे मन में उदासी छा रही है ।" भगवान बोले हे प्यारी ! मेरा संध्याकाल ढल जाने के कारण मेरे संध्या के कार्य-क्रम में लोप आया अतः मुझे बहुत चिन्ता

है। देवों के भी देव शंकर के वचन सुनकर देवी ने उत्तर दिया कि हे महेश्वर! यह आपका मुख्य सेवक आपको संध्या के समय सचेत करने के लिये चिरकाल तक डमरू हाथ में लेकर रहे। महेश्वर ने देवी के वचनों के साथ सहानुभूति दिखाई और स्वयं कुमार जी को हर्षाते हुए देवी के साथ वार्तालाप करने में मग्न हुए। हे देवी! उसी दिन से देवताओं से भी मान्य डामरक नाम वाला प्रमुख गण शंकर को संध्याकाल से सचेत करने के लिये वहां रहने लगा।

हे सुन्दर मुख वाली! एक दिन जब कि शंकर अपने पुत्र के साथ खेलते थे वह सेवक प्रमाद की निद्रा में अचेत हो गया, और उसकी असावधानी से शंकर का संध्या समय बीत गया।

विमृश्य संध्यालोपं स देवदेवो भवः स्वयं।
क्रुधा शशाप गिरिजे! महाडामरकं गणं ॥२८३॥
यस्मान्निद्रावशेनैव संध्यालोपस्त्वया कृतः।
मम तस्माच्चिरं तिष्ठ शिलीभूतो गणाधिप! ॥२८४॥
इति शप्त्वा गणं तत्र देवदेवो हरः स्वयं।
तस्थौ ध्यानस्थितो देवि! चिरं तस्मिन्महीधरे ॥२८५॥
तदा प्रभृति देवेशि! महाडामरको गणः।
दृषद्रूपोऽभवत्तत्र रत्नपर्वतमूर्धनि ॥२८६॥
यः कश्चिन्मानवो लोके गणं डामरकं श्रयेत्।
स याति ब्रह्मसायुज्यमिति सत्यं वदामि ते ॥२८७॥
यः कश्चिदपि चेशानि! पुण्यं गर्भगृहं[1] श्रयेत्।
गर्भात्स मुच्यते जन्तुरिति सत्येन ते शपे ॥२८८॥

भैरवी :— गर्भागारश्च को देव किमर्थं तत्र स्थापितः।
किं फलं निस्सृतानाञ्च नाराणामद्य तद्वद ॥२८९॥

भैरव :— शृणु वक्ष्ये महादेवि! गर्भागारमनुत्तमं।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकपञ्जरात् ॥२९०॥

---

1. आधुनिक 'गर्भयात्रा'।

पुरा नन्दिनमासाद्य भृशं देवा विवादिनः ।
निषिद्धास्तेन तत्रैव युयुधुस्ते परस्परम् ॥२६१॥
सुरैर्विना तदा नन्दी प्रणिपत्य परं हरं ।
दण्डं त्यक्त्वा चविज्ञाप्तिं चकार सुरपूजिते ! ॥२६२॥
भगवन्करुणासौध ! लोकनाथ जगत्पते ! ।
उद्विजामि भृशं त्रस्तो देवेभ्य इति चेश्वरम् ॥२६३॥

हे पार्वती ! भगवान शंकर को जब संध्या के लुप्त होने का ध्यान आया तो क्रोधी होकर प्रमुख गण डामरक को शाप दिया। हे प्रधान गण ! जिस कारण प्रमाद में पडकर तूने मेरी संध्या का लोप किया अतः तुम यहीं पर चिरकाल तक पत्थर बनकर रहो। हे देवी ! भगवान उस गण को इस प्रकार शाप देकर स्वयं चिरकाल पर्यन्त उसी पर्वत पर समाधि में लीन हुए। हे देवी ! उसी दिन से लेकर वह डामरक नाम वाला गण रत्न-पर्वत की अधित्यका पर पत्थर बन गया है। जो कोई भी मनुष्य संसार में उसी डामरक गण की शरण में आता है, मैं तुम्हें सत्य कहता हूँ कि वह परब्रह्म में लय हो जाता है। हे देवी ! मैं तुम्हारी कसम खाकर सच कहता हूँ कि यदि कोई मनुष्य पवित्र गर्भागार में प्रवेश करता है वह पुनः गर्भ में आने से छूट जाता है।

भैरवी :—हे देव ! गर्भागार किस को कहते हैं, वह वहां पर क्यों रखा गया है, और उस में से निकलने वालों को क्या फल मिलता है ?

भैरव :—हे देवी ! सुनो मैं उत्तम गर्भागार का वृत्तान्त कहता हूँ जिसको सुनकर मनुष्य भयङ्कर पापों के पिञ्जरे से मुक्त होता है। प्राचीन काल में आपस में विवाद करते हुए देवता लोग नन्दी के पास आये, उससे निषेध किये जाने पर भी उन्हें आपस में युद्ध छिड ही गया। हे देवपूजिते ! अनन्तर नन्दी देवों के बिना ही भगवान शंकर को प्रणाम करके दण्ड नीचे रखकर प्रार्थना करने लगा कि हे दयालु, लोगों के नाथ, जगत्पति ! मैं देवों के भय से अत्यन्त उद्विग्न हो गया हूँ।

श्रुत्वा नन्दिवचो देवि ! हरः प्रोवाच तं मुदा ।
गृहाण दण्डं भो नन्दिन् ! किं करिष्यन्ति ते सुराः ॥२६४॥
गर्भद्वारमिदं सम्यक् स्थापयाशु समन्ततः ।
यतो निस्सरणे शक्ति न लभन्ते सुरासुराः ॥२६५॥
इति श्रुत्वा वचस्तस्य महेशस्य महागणः ।
महत्प्रस्थं समुत्पाट्य गर्भागारं चकार वै ॥२६६॥
गर्भागारान्निस्सरति यः कश्चिन्मानवः प्रिये ! ।
स याति शिवासायुज्यं न पुनस्तन्यपो भवेत् ॥२६७॥
यः कश्चिदपि चेशानि ! भ्रूणहा गुरुतल्पगः ।
मातृहा पितृहा चैव सुरापो भ्रातृहापि च ॥२६८॥
स याति परमं दिव्यं पदं माहेश्वरं प्रिये !
कलौ पापवनं चेत्त्वं प्रसभं छेत्तुमिच्छसि ॥२६९॥
तदाश्रय सुदेवेशि ! गर्भागारं नु पुण्यदम् ।
गोलः[1] कुण्डजो वापि यः कश्चिदत्र निस्सृतः ॥३००॥
स भवेत्तु गणो देवि ! चेति सत्येन ते शपे ।
स्नात्वामरवतीं पुण्यां नदीं परम पावनां ॥३०१॥
भस्माङ्कसितदेहश्च बहुवस्त्रविवर्जितः ।
प्रलपन्[2] 'शिवपन्थानं देहि मे परमेश्वर' ! ॥
नमः करोतु देवेशं गुहास्थममरेश्वरम् ॥३०२॥

इति नवमः परिच्छेदः

नन्दी के वचन सुनकर भगवान हर्ष से उसे बोले कि हे नन्दी ! तुम दण्ड को उठाओ देवता तेरा क्या बिगाड सकते .हैं ? तुम शीघ्रतापूर्वक अपने इरद गिरद एक गर्भागार बनाओ क्योंकि उस में से देव तथा

---

1. १ पंक्ति क, ग, पु० अधिक पाठ।
2. पति के जीते ही उपपति से उत्पन्न सन्तान कुण्डज और पति के मरने के बाद उपपति से उत्पन्न सन्तान गोलक कहलाती है। 'अमृते जारजः कुण्डः मृते भर्त्तरि गोलकः' अमरकोश।

राक्षस भी निकल न सकेंगे। प्रमुख गण नन्दी ने शंकर के वचन सुन कर एक बड़े पत्थर को तोडकर गर्भागार बना डाला। हे प्रिये! यदि कोई मनुष्य गर्भागार के मध्य में से निकलता है तो वह शिव स्वरूप बन जाता है और उसे फिर कभी बच्चा नहीं बनना पडता है। हे ईश्वरी! जो कोई भी गर्भघाती, गुरुपत्नी के साथ संग करने वाला, मातृघाती, पितृघाती शराबी अथवा भ्रातृघाती हो वह भी यहां पर पवित्र दिव्य माहेश्वरपद प्राप्त कर लेता है। हे देवी! यदि तू भी कलियुग के पाप समूहों का बल पूर्वक छेद करना चाहती हो तो पवित्र गर्भागार की शरण में चली जावो। जो कोई भी नारज अथवा कुण्डज इस गर्भागार में से निकलता है मैं तुम्हारी कसम खाकर कहता हूँ कि वह भी गण बन जाता है। अनन्तर पवित्र नदी अमरावती में स्नान करके, विभूति से शरीर को सफेद बना कर, थोड़े से वस्त्र पहन कर, 'हे शंकर! मुझे मार्ग दीजिए' इस प्रकार के वाक्य का उच्चारण करता हुआ, गुफा में स्थित देवों के देव अमरेश्वर की वन्दना करे।

भैरवी :— स्मारं स्मारं महेशान! पुण्यं माहात्म्यमुत्तमं।
तीर्थानां परमं दिव्यं निवृत्तास्मि भवार्णवात् ॥३०३॥
इदानीं श्रोतुमिच्छामि ह्यमरेशं महेश्वरं।
कथं स ह्यमरेशाख्यो गुहास्थोऽन्वभवत्किल? ॥३०४॥
नदी च परमा दिव्या कथं सा ह्यमरावती।
तत्सङ्गमस्य माहात्म्यं वद मे हितकाम्यया ॥३०५॥

भैरव :— 'साधु[1] साधु महाभागे प्रश्नमेतत् सुदुर्लभं।
कृतं त्वया पूजितया जनानां हितकाम्यया ॥३०६॥
शृणु वक्ष्ये महातीर्थममरेशस्य सुन्दरि!।
यच्छ्रुत्वापि प्रमुच्येत महापातककोटिभिः ॥३०७॥
नासदासीन्नो सदासीत्तदानीमपि चेश्वरि!।
नियतिरभवत्तस्मात् केवलात्परमात्मनः ॥३०८॥

1. २ पंक्तियां ख, ब, पु० अधिक पाठ।

[1]नियतेरहमुत्पन्न इति शुश्रुम सुन्दरि !।
अहमः मृत्युरभवत् सेन्द्रा देवा ममानुगाः ॥३०९॥
ऋषयः पितरश्चापि गन्धर्वोरगराक्षसाः ।
यक्षा भूतगणाश्चापि कूष्मांडभैरवादयः ॥३१०॥
मनुष्या जम्बुकाः क्रूरा दैत्यदानवपुंगवाः ।
एते चान्ये च बहव उत्पन्ना नियतेः स्वयं ॥३११॥
चतुर्दशविधो भूतसर्गः प्रादुरभूत्ततः ।
मृत्युस्तानग्रसत्सर्वान्देवानपि सवासवान् ॥३१२॥
देवास्ते मृत्युना ग्रस्ता व्याकुला ह्यभवन् प्रिये ! ।
मामेत्य शरणं जग्मुः शरण्यं परमेश्वरं ॥
तुष्टुवुः[2] परमप्रीत्या शिवं भवमनामयं ॥३१३॥

भैरवी :—हे महेश्वर ! मैं तीर्थों के पवित्र दिव्य माहात्म्य का स्मरण करने से भवसागर के पार हो गई हूँ। अब तो मैं महेश्वर अमरेश का वृत्तान्त सुनना चाहती हूँ कि किस प्रकार वह अमरेश्वर गुफा में स्थित हुए थे, और वह पवित्र दिव्य अमरावती नदी किस प्रकार प्रादुर्भूत हुई थी, तथा साथ ही यह भी मेरा हितकार करने के लिए कहिये कि अमरावती के सङ्गम का क्या माहात्म्य है ?

भैरव :—हे पूजनीया, बड़े भाग्यवाली देवी ! तुम्हें शाबाश हो तुमने तो लोगों के हितकार करने की इच्छा से यह अत्यन्त दुर्लभ प्रश्न मुझ से किया। हे सुन्दरी ! सुन मैं तुम्हें अमरेश नामक महान तीर्थ का वर्णन सुनाता हूँ जिसको सुनने से ही मनुष्य करोड़ों भयावह पापों से भी मुक्त हो जाता है। हे ईश्वरी ! सृष्टि के पूर्व न किसी वस्तु का भाव ही था और न अभाव ही। उस समय केवल परमेश्वर की सत्ता विद्यमान थी जिस से प्रकृति उत्पन्न हुई। हे सुन्दरि ! सुना जाता है कि प्रकृति से 'अहं' की उत्पत्ति हुई तथा 'अहं' से मृत्यु तथा मेरे सेवक इन्द्रादि देवता भी उत्पन्न हुए। इनके साथ ही (उसी मूल प्रकृति से) ऋषि, पितर, गन्धर्व, सर्प,

---

1. १ पंक्ति क, ख पु० अधिक पाठ। 2. १ पंक्ति ख पु० अधिक पाठ।

राक्षस, यक्ष, भूत, कूष्मांड, भैरव आदि, मनुष्य, शृगाल आदि पशु, राक्षस, बड़े बड़े दानव तथा दूसरे जीव उत्पन्न हुए। अर्थात् संक्षेप में यों कहा जाता है कि चौदह प्रकार की जीवसृष्टि उसी नियति से प्रादुर्भूत हुई। मृत्यु ने उन सब इन्द्रादि देवों को खाना आरम्भ किया। हे प्रिये! वह देव मृत्यु से ग्रस्त होने के कारण अत्यन्त व्याकुल होकर, शरण देने वाले परमेश्वर, निर्विकार मुझ शंकर की शरण में आकर अत्यन्त हर्ष से मेरी स्तुति करने लगे।

दवा :— नमः[1] शिवाय देवाय विभवे प्रभविष्णवे ।
नमश्चिच्चन्द्रिकोद्बोध प्रकाशानन्दरूपिणे ॥३१४॥
परमार्थदशास्थाय स्थाणवे विश्वभाविने ।
नमश्चित्याय चेत्याय चेतज्ञाय चितर्थिने ॥३१५॥
चिच्चन्द्रनाशिताशेषमोहध्वान्ताय शम्भवे ।
विमर्शिने विधिज्ञाय विज्ञानाय नमो नमः ॥३१६॥
विश्वज्ञाय च विश्वाय जय विश्वोपकारिणे ।
विश्वरूपाय देवाय विश्वावासाय ते नमः ॥३१७॥
नमो विधिनिषेधाय विधिज्ञपतये नमः ।
निषेधज्ञाय देवाय तत्स्वरूपाय ते नमः ॥३१८॥
इडा पिङ्गलरूपाय नमस्तन्मध्यवर्तिने ।
सुषुम्णामध्यगायापि सूक्ष्माय शम्भवे नमः ॥३१९॥
नमस्ते सर्वसृग्याय मोक्षमार्गार्थदर्शिने ।
नमो नियतिरूपाय तत्वरूपाय ते नमः ॥३२०॥
महत्तत्वाय देवाय सूक्ष्मतत्वाय ते नमः ।
नमोऽमृताय देवाय नमोऽमृतस्वरूपिणे ॥३२१॥
मृत्युञ्जयाय देवाय भूयो भूयो नमो नमः ।
इति श्रुत्वा तु देवानां स्तुतिं परमपावनाम् ॥३२२॥
हरो गम्भीरया वाचा देवांस्तान्प्रत्युवाच ह ।
किमर्थमागता यूयमाकुलाः सुरसत्तमाः ॥३२३॥

---

1. १ पंक्ति क, ग पु० अधिक पाठ ।

कथयध्वं यतस्सर्वमदेयमपि वो ददे ।
इति तस्य महेशस्य श्रुत्वा देवाः सवासवाः ।।३२४।।
प्रत्यूचुस्तं हरं मृत्युर्ग्रसतीति बलाद्धि नः ।
यतो न मृत्युर्नश्येन्नो न ग्रसेच्च बलेन ह ॥
तत्कुरुष्व महादेव! भक्तानामार्तिनाशन ! ।।३२५।।

देव :—मंगलस्वरूप देवता, सर्वैश्वर्यमान, सर्वशक्तिमान, शिव को प्रणाम हो। विमर्शमय चन्द्रिका के, प्रति समय प्रबुद्ध होने के कारण केवल प्रकाशमय तथा आनन्दमय, तथा परदशा में स्थित होकर ही (बाह्य उन्मेष द्वारा) विश्व की कल्पना करने वाले शंकर को प्रणाम हो। चित्स्वरूप, शुद्ध विमर्श के ही विषय, चेतन होने से सर्वज्ञ, केवल चिति के विस्फारात्मक अर्थ वाले तथा चितिशक्ति की कौमुदी से अपास्त किये हुए मोहतिमिर वाले शम्भू को प्रणाम हो। विमर्शमय, विधिनिषेधादि से परिचित, ज्ञान मय, विश्व को जानने वाले, विश्वरूप तथा विश्व के कल्याण पर निरत शिव को जय जयकार हो। विश्वरूप देवता, विश्वविग्रह, विधि निषेधरूप, विधि जानने वालों के भी अधीश, निषेध से परिचित (अर्थात् बाह्य निमेष द्वारा संसार का निषेध करने वाला) देवस्वरूप शंकर! तुझे प्रणाम हो। इडा तथा पिंगला स्वरूप, उन दोनों की मध्यवर्तिनी सुषुम्णास्वरूप, सुषुम्णा के भी मध्यवर्ती सूक्ष्म पर ब्रह्मरूप! तुझे प्रणाम हो। सबों से ढूँडने के योग्य, मोक्ष मार्ग दिखाने वाले, प्रकृतिरूप तथा ३६ तत्वरूप तुझे प्रणाम हो। महत्तत्वरूप तथा सूक्ष्मतत्त्वरूप, अमरवर देने वाले, सदा अमर होने के कारण मृत्युञ्जय देव को बार बार प्रणाम हो।

इस प्रकार देवों की परम उत्कृष्ट स्तुति को सुनकर शंकर गम्भीर वाणी से देवताओं को बोले, हे देवता लोगो! तुम व्याकुल होकर क्यों आये हो? कहो तो मैं तुम्हें अदेय वस्तु भी दे सकता हूँ। इन्द्रादि देवों ने उस शंकर के वचन सुनकर उत्तर दिया, कि हे भगवान! मृत्यु बल से हमें खाये जा रहा है। भक्तों की पीडा हरने वाले महादेव आप वैसा कोई उपाय कीजिए जिस से मृत्यु बलपूर्वक हमारा नाश न कर बैठे।

श्रुत्वा देववचः सौम्ये ! महेशः प्रत्युवाच तान् ।
मृत्यूपायं करिष्यामि सहध्वं क्षणमुत्तमाः ॥३२६ ॥
गृहीत्वा शिरसस्तत्र हरः चन्द्रकलां स्वयं ।
सम्पीड्य देवानददन्मृत्युभैषजमुत्तमम् ॥३२७॥
पीडनाद्या निस्सृता च धारा परमात्मिके ! ।
सैव भूता पुण्यनदी नाम्ना या ह्यमराबती ॥३२८॥
ये बिन्दवश्च्युता देवि ! शरीरेऽमृतबिन्दवः ।
ते भस्मरूपतां प्राप्य च्युता चाश्यानतां गताः ॥३२९॥
प्रेम्णा तेषां महादेवि ! शिवोऽपि द्रवतामगात् ।
तेऽवलोक्य शिवं तत्र द्रवीभूतं महेश्वरि ! ॥३३०॥
तुष्टुवुः वाग्भिरर्थ्याभिः प्रणेमुश्च पुनः पुनः ।
रस आश्यानतां प्राप्य लिङ्गरूपोऽभवद्गिरौ ॥३३१॥
लिङ्गरूपं हरं वीक्ष्य घनीभूतं महेश्वरि ! ।
पुनः पुनर्नमश्चक्रुर्भवं कारुणिकं परं ॥३३२॥
देवान् नुतिपरान् दृष्ट्वा प्रोवाच सुरसत्तमान् ।
हरः परमया वाचा शृणुध्वं देवसत्तमाः ! ॥३३४॥
यस्माद्भवद्भिर्दृष्टं मे प्रेमलिङ्गं दरीगृहे ।
तस्मान्न मृत्युर्युष्मान्वै बाधते मदनुग्रहात् ॥३३५॥
इहैव[1] ह्यमरा भूत्वा गच्छध्वं देवसत्तमाः ।
इतो प्रभृति लिङ्गं मे ह्यमरेशाख्यमुत्तमम् ॥३३६॥
पुण्यं परमकं देवास्त्रिलोके ख्यातिमेष्यति ।
नत्वा च दण्डवत्तत्र लिङ्गं तदमरेश्वरं ॥
प्रदक्षिणीकृत्य देवाः स्वं स्वमालयमाययुः ॥३३७॥

हे सुन्दरि ! शंकर देवताओं के वचन सुनकर बोले कि हे देवो ! तुम क्षणमात्र तक इस दुःख को सहन करो अभी मैं तुम्हारे मृत्यु का उपाय करता हूँ। भगवान् ने स्वयं अपने सिर से चन्द्रकला को उतारा और निचोड कर देवताओं को मौत से बचने की उत्तम दवाई दे दी।

1. १ पंक्ति ख, ग पु० अधिक पाठ ।

हे भगवती ! चन्द्रकला को निचोडने से जो धारा बह चली वही एक पवित्र नदी बन गई जिस का नाम अमरावती है। हे देवी ! जो अमृत की छीटें शिव के शरीर पर पड गाई वह जम कर विभूति का रूप धारण कर गई और हे देवी ! देवों के स्नेह से शिव स्वयं पिघल गये। हे महेश्वरी ! देवता लोग वहां पर पिघले हुए शंकर को देखकर अर्थपूर्ण वाणियों से स्तुति करते हुए बार बार प्रणाम करने लगे। वह पिघला हुआ रस जम कर पहाड पर लिङ्गाकार बन गया। हे महेश्वरी ! देवता लोग जम कर लिङ्गाकार बने हुए परमदयालु शंकर को देखकर—बार बार नमस्कार करने लगे। उत्तम उत्तम देवताओं को स्तुति करते हुए देखकर भगवान उत्तम वाणी बोले,— कि हे देवता लोगो ! सुनो यतः तुमने गुफा में मेरे प्रेमलिङ्ग का दर्शन किया अतः मेरे अनुग्रह से मृत्यु आपको सता न सकेगी। हे देवो ! तुम यहीं से अमर बन कर चले जाओ और आज से यह मेरा पवित्र लिङ्गस्वरूप तीनों लोकों में अमरेश नाम से प्रसिद्ध होगा। देवता लोग उस अमरेश्वर लिङ्ग का दण्डवत् प्रणाम करके तथा प्रदक्षिणा भी करके अपने घर चले गये।

इति दत्त्वा वरं देवानमरेशो महेश्वरि ! ।
तदा प्रभृति लीनोऽभूद्गिरिदर्यन्तरे हरः ॥३३८॥
अमां सोमकलां गृह्य हीश्वराणां हितेप्सया ।
मृत्युनाशं चकाराशु तस्माद्वै ह्यमरेश्वरः ॥३३९॥
मृत्युहीना यतो देवि ! ईश्वरेण कृताः सुराः ।
ततः प्रोक्तं पुराविद्भिर्ह्यमरेश्वरसंज्ञकम् ॥३४०॥
भवरोगञ्च गृह्णाति भक्तानां चेश्वरः स्वयं ।
यद्दर्शनात्ततः प्रोक्तममरेश्वरसंज्ञकम् ॥३४१॥
अमा प्रभृति पूर्णान्तं कलां गृह्णाति चेश्वरः ।
ततः प्रोक्तश्च तन्त्रज्ञैर्भगवानमरेश्वरः ॥३४२॥
यद्बिन्दुरसनञ्चैव जरामरणमोचनं ।
मोक्षैश्वर्यप्रदं तस्मात्प्रोक्तममरसंज्ञकम् ॥३४३॥
इदं रसमयं लिङ्गं महाप्रेमसमुद्भवं ।
सामरस्यप्रदं देवि ! तव स्नेहाप्रकाशितम् ॥३४४॥

यात्रां कृत्वा तु देवेशि ! स्नात्वामरवतीजले ।
भस्मनालिप्य चाङ्गानि मोक्षमाप्नोति मानवः ॥३४५॥
कुर्याद्यो[1] ताण्डवं देवि ! गुहायां सुप्रहर्षितः ।
स रुद्र एव कथितो नरः परम पावनः ॥३४६॥
यः सवासा गुहास्थञ्च प्रपश्येल्लिङ्गमुत्तमं ।
स याति नरकं घोरं यावद्रिन्द्राश्चतुर्दश ॥३४७॥
यः पश्येद्भस्महीनाङ्गः सुधालिङ्गं सनातनं ।
स कुष्ठी च भवेद्देवि ! जन्तुर्जन्मनि जन्मनि ॥३४८॥
यात्रामकृत्वा यो देवि ! प्रपश्येदमरेश्वरं ।
स याति दारुणान्घोरान्नरकानेकविंशतिम् ॥३४६॥

हे महेश्वरी ! देवताओं को इस प्रकार वर देकर अमरेश गुफा में लीन हुए। इस को अमरेश्वर इसी लिये कहते हैं क्योंकि इसने अमा अर्थात् चन्द्रकला को लेकर देवताओं के हितकार के लिये मृत्यु का नाश किया। अथवा हे देवी ! जिस कारण ईश्वर ने देवों को अमर कर दिया अतः प्राचीन विद्वानों ने इसका नाम अमरेश्वर रख दिया। अथवा जिस के दर्शन से ईश्वर स्वयं ही भक्तों को संसाररूपी रोग से छुटकारा देते हैं उसका नाम अमरेश्वर है।

तन्त्र जाने वालों ने इसी कारण इसका नाम अमरेश्वर रखा क्योंकि यह अमा कला से लेकर पूर्ण कला तक कलाओं का ग्रहण करता है। जिसके एक एक बिन्दु का अस्वाद करने से जरा तथा मरण से मुक्ति और मोक्षपद की प्राप्ति होती है उसको अमरनाथ कहते हैं। हे देवी ! समरसता को देने वाले, अत्यन्त प्रेम से उत्पन्न रसलिङ्ग का वृतान्त मैंने तेरे स्नेहातिरेक से ही तेरे सामने प्रकट किया। हे देवेशी ! यात्रा के अनन्तर अमरावती के जल में स्नान करके अपने अङ्गों पर विभूति का लेप करने से मनुष्य मुक्ति प्राप्त कर लेता है। हे देवी ! जो मनुष्य गुफा में प्रसन्न होकर ताण्डव नृत्य करता है वह परम पवित्र मनुष्य साक्षात् रुद्र ही माना गया है। जो मनुष्य वस्त्रों के सहित ही गुफा में विद्यमान लिङ्ग का दर्शन करे वह उतने

1. १ पंक्ति क, ख पु० अधिक पाठ।

समय तक घोर नरकों में जाता है जितने समय तक १४ इन्द्रों की स्थिति है।

हे देवी ! जो मनुष्य भस्म का लेप करने के बिना ही प्राचनी अमरलिङ्ग का दर्शन करता है वह कुष्ठी होकर जन्म जन्म में पापी बनता है। हे देवी जो मनुष्य विधिपूर्वक यात्रा को न करके ही अमरेश्वर का दर्शन करता है वह २१ भयङ्कर नरकों को जाता है।

योऽकृत्वा ताण्डवं देवि ! पश्येद् गिरिगुहान्तरे।
सुधालिङ्गं भवत्येव तीर्थद्रोही न संशयः ॥३५०॥
योऽपूज्य प्रतियात्येव नरोऽमरगुहान्तरात्।
चतुरशीतिलक्षाणि नरकाणि प्रयाति वै ॥३५१॥
योऽदत्त्वा पुनरायाति ह्यमरेशगुहान्तरात्।
स याति दारुणं घोरं नरकं कालसूत्रकम् ॥३५२॥
महापातक[1] युक्तो वा युक्तो वा ह्युपपातकैः।
दृष्ट्वा रसमयं लिङ्गं सद्यो मुच्येत सुन्दरि ! ॥३५३॥
भ्रूणहा गुरुतल्पी च सुरापः स्वर्णहारकः।
एते दृष्ट्वा महेशानममरेश्वरसंज्ञकम्।
मुच्यन्ते तत्क्षणादेवि ! सत्यं सत्यं वरानने ! ॥३५४॥
अभक्ष्यभक्षी मधुपः सुरेज्यात्यागी प्रिये ! वत्सहा बालहाच।
गर्भाघाती स्रावकृत्पानकृच्च सद्यो मुच्येद्वीक्ष्य मां लिङ्गरूपम् ॥३५५॥
महाक्रोधी लोभमोहाभिभूतः स्वर्णस्तेयी परजायाभिगामी।
छिद्रप्रेक्षी साधुनिन्दारतश्च दम्भी चौरोऽनृतवागल्पबुद्धिः ॥३५६॥
दृष्ट्वा देवममरेशाख्यलिङ्गं द्रवीभूतं पर्वतस्यान्तरे हि।
मुच्येत्तस्मात्पापसंघाच्च देवि ! सत्यं सत्यं नानृतं ते वदामि ॥३५७॥
चान्द्रयणैः[2] कृच्छ्र शतैर्महासंतापनैश्च यत्।
फलं प्राप्नोति लोकेऽस्मिन्तत्प्राप्नोत्यस्य दर्शनात् ॥३५८॥
कलिकल्मषघोरनाशनं रसलिङ्गं समुदीरितं प्रिये !।
अमरेश्वरनामकं परं तत्पशुपाशविनाशकारणम् ॥३५९॥

---

1. १ पंक्ति क, ख पु० अधिक पाठ। 2. १ पंक्ति ख, ग, पु० अधिक पाठ !

सिद्धिलिङ्गमिदं देवि ! बुद्धिलिङ्गमिदं परं ।
शुद्धिलिङ्गमिदं प्रोक्तं वृद्धिलिङ्गं सनातनम् ॥३६०॥
इदं पुंसवनं लिङ्गं महातेजोऽभिवर्धनं ॥
कन्याप्रदं पुत्रप्रदं परमं योगदं कलौ ॥३६१॥

हे देवी ! जो ताण्डव करने के बिना ही गुफा में रसलिङ्ग का दर्शन करता है निसंशय वह तीर्थ के साथ द्रोह करता है। जो मनुष्य पूजा करने के विना ही अमरेश्वर की गुफा से वापस आता है वह ८४ लाख नरकों को जाता है। जो मनुष्य दान देने के बिना ही अमरेश्वर की गुफा से लौट आता है वह कठिन कलसूत्र नामक नरक को जाता है। हे सुन्दरी ! उत्कट पापों से अथवा साधारण पापों से आवृत मनुष्य भी रसलिंग का दर्शन करके तत्क्षण मुक्त होता है। हे सुन्दर मुखवाली देवी ! गर्भघाती, गुरुपत्नी को गमन करने वाला, शराबी, सोना चुराने वाला, यह सारे अमरेश नामक भगवान का दर्शन करने से मुक्त होते हैं। हे प्रिये ! अभक्ष्य खाने वाला, शराबी, देवयज्ञों से विमुख, बछडे अथवा बच्चे को मारने वाला, गर्भघाती, गर्भपात करने वाला अथवा अपेय पान करने वाला मनुष्य मुक्त लिंगस्वरूप का दर्शन करने से मुक्त होता है। हे देवी ! तुम झूठ न समझना मैं निस्संदेह सच कहता हूँ कि अत्यन्त क्रोधी, लोभ तथा मोह से भरा हुआ, स्वर्णचौर, परस्त्रीगमन करने वाला, दूसरे के दोषों को ढूँढने वाला, साधुओं की निन्दा पर निरत, दम्भी, चौर, असत्य कहने वाला तथा अल्पबुद्धि ये सारे भी पर्वत की गुफा में द्रवीभूत अमरेश लिंग का दर्शन करने से छूट जाते हैं। जो फल चान्द्रायणों से, सैंकडों कष्ट, अथवा उत्कट संतापों के सहने से मिलता है वह इसके दर्शन से मिलता। हे प्रिये ! यह रसलिंग कलि के कठिन मलों का नाश कारक कहा गया है। इसका दूसरा नाम अमरेश है और यह माया और सांसारिकता का नाश करने वाला है। हे देवी ! इसी को सिद्धि लिंग, बुद्धिलिंग, शुद्धिलिंग, पुरातन वृद्धिलिंग, पुंसवनलिंग इत्यादि नामों से पुकारा जाता है। यह तेज को बढ़ाने वाला तथा कन्या पुत्रादि फलदायक, कलियुग में उत्कृष्ट योगसिद्धि को देने वाला है।

विना ध्यानं विना दानं सिद्धिं देवि ! यदीच्छसि ।
तदाश्रयस्व शीघ्रं वै लिंगममरसंज्ञकम् ॥३६२॥
शरीरं यौवनं द्रव्यं दारान् पुत्रान् गृहांस्तथा ।
चञ्चलान्सर्वतो ज्ञात्वा ह्यमरेशं समाश्रयेत् ॥३६३॥
यावन्न ग्रसते मृत्युर्यावन्नेन्द्रियविप्लवः ।
यावन्न जरया देहं जीर्यते जगदम्बिके ! ॥३६४॥
तावदेवामरेशाख्यं लिंगं रसमयं श्रयेत् ।
त्रैलोक्ये[1] यानि तीर्थानि प्रोक्तानि जगदम्बिके ! ॥३६५॥
अमरेशाख्यलिंगस्य कलां नार्हन्तिषोडशीम् ।
महामोहेन[2] ग्रस्तोऽयं जनः सर्वो महेश्वरि ! ॥३६६॥
अमरेशेऽपि भूमिस्थे यच्छोचति कलौ नरः ।
भूयो भूयः किमुक्तेन नरः पातकवान् कलौ ॥३६७॥
अमरेशं समाश्रित्य मुक्त एव न संशयः ।
नारी वा पुरुषो वापि पूजयेल्लिंगमुत्तमम् ॥३६८॥
स याति शिवसायुज्यं यत्र गत्वा न शोचते ।
पीत्वा ह्यमरधारां तु पतितां तां गुहान्तरे ॥३६९॥
देवि ! याति शिवं स्थानं यत्र नास्ति कृताकृतं ।
द्रष्टुममरनाथस्य पदं यश्च व्रजेद् गृहात् ॥३७०॥
पदे पदेऽश्वमेधानां प्राप्नोति फलमुत्तमं ।
इत्थं माहात्म्यमीशानि ! पुण्यममरनाथकम् ॥३७१॥
श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिकोटिभिः ।
कपोतांस्तु गणांस्तत्र दृष्ट्वा हृष्टश्च यो नरः ॥३७२॥
जयेति प्रवदेदुच्चै रुद्र एव न संशयः ।
इत्येष पटलो गुह्यो गोपनीयः सदा प्रिये ! ॥
श्रुतोऽनुध्यातः पठितो महापातकहा स्मृतः ॥३७३॥

इति दशमः परिच्छेदः ।

---

1. १ पंक्ति क पु० अधिक पाठ । 2. १ पंक्ति क, ख पु० अधिक पाठ ।

हे देवी ! यदि तुम ध्यान तथा दान के विना ही परमार्थ सिद्धि चाहती हो तो शीघ्र अमरेश्वर की शरण ले लो। प्रत्येक व्यक्ति को शरीर, जवानी, धन, स्त्री, पुत्र, घर इत्यादि वस्तुओं को क्षणभङ्गुर समझ कर अमरेश का आश्रय लेना चाहिये। हे जगत की माता ! जब तक मृत्यु ग्रास न करे, जब तक इन्द्रियां ढीली न पड जायें, जब तक बुढ़ापा शरीर को जीर्ण न करे तब तक ही अमरेश नामक रसलिंग की शरण में जाना चाहिये। हे जगन्माता ! तीनों लोकों में जितने भी तीर्थ हैं वह अमरलिंग के १६वें भाग के समान भी नहीं हैं। हे महेश्वरी ! वास्तव में सारे लोग महामोह के अन्धेरे से ग्रस्त हैं कि वह कलियुग में भूमि पर अमरेश जैसा तीर्थ होते हुए भी शोक में पड़े हैं। बार बार कहने का क्या प्रयोजन है कलियुग में पापी मनुष्य यदि अमरेश का आश्रय ले ले तो वह निसंशय मुक्त ही है। स्त्री हो या पुरुष जो कोई भी उत्तम (अमर) लिंग की पूजा करे वह दुःखों से उन्मुक्त होकर शिव के साथ अभेद प्राप्त करता है। हे देवी ! मनुष्य, गुफा में पडने वाली अमरधारा को पीकर उस शैवपद को जाता है जहां न पुण्य है और न पाप। जो मनुष्य अमरेश का स्थान देखने की इच्छा से घर से निकले उसे कदम कदम पर अश्वमेधयज्ञों का फल मिलता है। हे ईश्वरी ! यह पवित्र अमरनाथ का माहात्म्य सुनने या पढ़ने से मनुष्यों को करोडों ब्रह्महत्याओं से मुक्ति मिलती है। जो मनुष्य वहां कबूतररूप धारी शिवगणों को देखकर फूले न समाता हुआ ऊंची आवाज़ में जैकार के नकारे बजाता है वह निसंशय साक्षात् रुद्र ही है। हे प्यारी ! यह रहस्यपूर्ण पटल हमेशा गुप्त रखना चाहिये क्योंकि यह सुनने से अथवा पढ़ने से ही भयङ्कर पापों को नाश करने वाला कहा गया है।

दशम परिच्छेद समाप्त हुआ।

भैरवी :— कपोता के गणास्तत्र कथं नूनं स्थिताः प्रभो !।
वद मे कृपया शम्भो ! लोकानां हितकाम्यया ॥३७४॥

भैरव :— शृणु सुश्रोणि ! वक्ष्यामि कपोता येऽभवन् किल।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकसञ्चयात् ॥३७५॥
यदाप्रभृति शप्तोऽभून्महाडामरको गणः।
तदाप्रभृति तत्रैव स्थापितास्ते गणास्तथा ॥३७६॥

तथैव वेदनार्थं हि सन्ध्याकालस्य सुन्दरि ! ।
एकदा नृत्यमानस्य संध्यायां चैव धूर्जटेः ॥३७७॥
स्पर्धया कुरु कुर्वीत्यूचुस्ततोऽमरवन्दिते ।
परस्परं स्पर्धयात्र शब्दं कुर्विति चक्रिरे ॥३७८॥
ततः स महेशानो गणानशपदोजसा ।
यस्मात्कुरु कुरु शब्दं कुरुथ स्पर्धया मुहुः ! ॥३७९॥
तस्मात् कुरु कुरु शब्दं कुर्वाणाः स्थ चिरं गणाः ।
कपोतरूपास्तीर्थेऽस्मिन् विघ्नसंघापहारिणः ॥३८०॥
इत्थं[1] शप्तास्ततो देवि ! हरेण परमात्मना ।
भूताः कपोतरूपास्ते तीर्थे विघ्नापहारिणः ॥३८१॥
योऽदृष्ट्वा तु गुहान्तस्थान् कपोतान् प्रमथान्प्रिये ! ।
अवारुहेद्गिरेस्तस्मात्तीर्थद्रोही मतो बुधैः ॥३८२॥
तस्मादत्र दर्शनीयाः कपोता गणसत्तमाः ।
महापापहराः प्रोक्ता यतिभिः पारमार्थिकैः ॥३८३॥

इत्येकादशः परिच्छेदः ।

भैरवी :— श्रुत्वा श्रुत्वा महेशान ! स्मारं स्मरामनुत्तमं ।
पुण्यंममरनाथाख्यं लिंग यत्कथित तव ॥३८४ ।
कृतार्थास्मि[2] कृतार्थास्मि कृतार्थास्मि न संशयः ।
क्रीतास्मि देवदेवेश ! तारितास्मि भवार्णवात् ॥३८५॥

भैरवी :—हे प्रभु ! कबूतर कौन से शिवगण हैं, और वहां क्योंकर रहते हैं ? हे शम्भू ! कृपया लोगों को हितकार करने के लिये सारा वृत्तान्त कहिये

भैरव :—हे अच्छी कमर वाली ! सुन मैं तुम्हें बतलाता हूँ कि कबूतर वास्तव में कौन थे, इसको सुन कर मनुष्य उत्कट पापों स मुक्त होता है । जिस दिन से महाडमरक गण को शाप दिया गया उसी दिन से उसके बदले और गण उसा प्रकार संध्याकाल से सचेत कराने के लिये वहां स्थापित

1. ३ पंक्तियां क पु० अधिक पाठ । 2 ३ पंक्तियां क, ग पु० अधिक पाठ ।

किये गये। एक दिन जब भगवान शंकर संध्याकाल में नृत्य कर रहे थे तो हे देवपूजिते! वह भी आपस में स्पर्धा से 'कुरु कुरु' (अर्थात् तुम भी करो तुम भी करो) इस प्रकार शब्द करने लगे। महेश्वर ने क्रोधी होकर उन गणों को शाप दिया, —कि गणो जिस कारण तुम स्पर्धा से 'कुरु कुरु' शब्द कर रहे हो अतः तुम इसी तीर्थ पर चिर काल तक कबूतर बन कर 'कुरु कुरु' ही करते रहो। (हां केवल तुम में यह शक्ति होगी) कि तुम यात्रियों के विघ्नों को दूर करते रहोगे। हे देवी! परम पुरुष शंकर द्वारा यह शाप पाकर वह कबूतर बन गये और तीर्थ पर विघ्नों को नाश करते रहते हैं। हे प्यारी! जो कोई भी गुफा में विद्यमान कबूतरों को देखने के बिना ही उस पर्वत से उतरता है उसे विद्वान लोग तीर्थद्रोही समझते हैं, इसलिये इस तीर्थ पर कपोतरूपधारी उत्तम गणों का दर्शन अवश्य करना चाहिये क्योंकि परमार्थ पथ के पथिक संन्यासी उन्हें पापनाशक कहते हैं।

ग्यारहवां परिच्छेद समाप्त हुआ।

भैरवी :—हे महेश्वर! आपके कहे हुए अमरनाथ नामक पवित्रस्थान का वर्णन सुन सुन कर तथा स्मरण करके मैं निसंशय कृतार्थ हुई हूँ और आपने मुझे मोल लेकर संसार सागर से पार उतार दिया है।

जय शम्भोः त्रिनेत्रेश! जय भक्तकृपाम्बुधेः!।
शिव! सर्व! जयेशान! त्रिपुरासुरसूदन!॥३८६॥
जय कपर्दिन्भगवञ्जय शूलधराच्युत!।
पिनाकपाणे! वरद जयान्धकविमर्दन!॥३८७॥
जय भक्तजनोद्दामकामनावरदेश्वर!।
जय भक्तिरसास्वादसारिताखिलविश्वप!॥३८८॥
जय घोरातिघोरेश जय पाशनिकृन्तन!।
जय भैरव भीमेश! जय श्रीपरभैरव!॥३८९॥
तारितास्मि भवाम्बोधेरुद्धृता भवकर्दमात्।
कथितं यत्त्वया नाथ! पुण्यं ह्यमरनाथजम्॥३९०॥
माहात्म्यममरेशस्य श्रुतं भवदनुग्रहात्।
अधुना वद देवेश! संशयोऽस्ति महान्मम॥३९१॥

कस्मिन्काले स्मृता यात्रा महाफलप्रदायिनी ।
दर्शनात्स्मरणाद्वापि गमनाच्चैव सुन्दर ! ।।३६२।।
श्राद्धाद्वाप्यमरावत्यां पञ्चनद्याश्च संगमे ।
दानात्किं फलमाप्नोति नरः पातकवान्कलौ ।।३६३।।
विशेषतश्च किं प्रोक्तं दानं सुरवरार्चित ! ।
यत्कृत्वा मुच्यते जन्तुर्महापातककोटिभिः ।।३६४।।
फलममरनाथस्य विस्तरेण वदस्व मे ।

भैरव :— साधु पृष्टं त्वया देवि ! यतो भक्तिस्तवानघे ! ।।३६५।।
पवित्रे ह्यमरेशाख्ये तीर्थे परमपावने ।
यतः स्वं दर्शयामास श्रावण्यां स हरः वपुम् ।।३६६।।
ततश्च कथिता यात्रा श्रावण्यां पुण्यदायिनी ।
श्रावणे शुक्लपक्षे तु यात्रां कृत्वा विधानतः ।।३६७।।
यः प्रपश्येत्पूर्णिमायां सुधालिङ्गं सनातनं ।
याति शैवं पदं सोऽपि पशुपाशविवर्जितः ।।३६८।।
यः श्रावण्यां महादेवि ! प्रपश्येद्गिरिमध्यगं ।
लिङ्गममरनाथाख्यं स याति शिवसन्निधौ ।।३६९।।

हे त्रिनेत्र ईश्वर ! भक्तों पर दयालु, सर्वव्यापक, त्रिपुर राक्षस के मृत्यु, शिव आपको जय हो। कपर्द (जटाजूट) धारण किये, त्रिशूलधारी भगवान तथा भक्तों को दुर्लभ कामनापूर्ति के वर देनेवाले ईश्वर ! आपकी जय हो। भक्ति रस के आनन्द से संसार को भरने वाले ! संसार के त्राता ! रुद्ररूप तथा संसार के पाश को काटने वाले भैरवरूप परदेवता, आपकी जय हो। हे नाथ ! आपने मुझे पवित्र अमरनाथ का माहात्म्य सुनाकर संसार सागर से पार लगाया, और संसार की दुःख रूपी कीचड से निकाल दिया। हे देवेश ! आपकी कृपा से मैंने अमरेश का माहात्म्य सुना, अब मुझे केवल एक संशय है—कि यह यात्रा किस समय में दर्शन, स्मरण अथवा गमन से उत्कृष्ट फलदायिनी होती है और कलियुग में पापी लोगों को अमरावती और पंञ्चतरणी के संगम पर श्राद्ध करने से क्या फल मिलता है ? विशेषकर यह बताइये कि इस स्थान पर कौन वस्तु दान

देने से मनुष्य करोड़ों महापापों से मुक्त होता है ? हे देव ! मुझे अमरनाथ का फल विस्तार से कहिये।

भैरव :—हे देवी ! तुमने यह एक अच्छा प्रश्न मुझ से पूछा क्योंकि तुम्हें तो परमपवित्र अमरेश तीर्थ पर भक्ति है। जिस कारण भगवान शंकर ने श्रावण पूर्णिमा के दिन अपना स्वरूप दिखाया है अतः यह यात्रा भी श्रावण के महीने में ही उत्कृष्ट फलदायिनी कही गई है। श्रावण शुक्लपक्ष में विधिपूर्वक यात्रा करके पूर्णिमा के दिन जो अमृतलिंग का दर्शन करे, वह पशुता अथवा पाश से छूटकर शिवपदवी प्राप्त कर लेता है। हे देवी ! जो श्रावणीपूर्णिमा के दिन पर्वत की गुफा में विद्यमान अमरनाथ लिंग का दर्शन करे वह शिव के ही समीप जाता है।

स्पर्शनाद्देवदेवस्य लिङ्गस्य जगदीशितुः।
पापकञ्चुकनिर्मुक्तो याति शैवं परं पदम् ॥४००॥
मुक्ताभिः[1] स्वर्णपुष्पैश्च रौप्येण सुरसुन्दरि !।
प्राप्नोति वै महापुण्यममरेशस्य पूजनात् ॥४०१॥
नरो मुक्तिमवाप्नोति सत्यं सत्यं वरानने !।
अन्यैश्च विधिवद् द्रव्यैः पूजयेद्योऽमरेश्वरं ॥४०२॥
धूपदीपैश्च नैवेद्यैः पुण्यमाप्नोति यागजम्।
आरात्रिकां महेशस्य घृताभ्युक्तां करोति यः ॥४०३॥
तिलतैलाभिषिक्तां वा स याति परमं पदं।
घृतगुग्गुलु[2] संयुक्तं यो धूपयति सुन्दरि ! ॥४०४॥
सर्वदुःखविनिर्मुक्तो याति सादाशिवं पदं।
प्रदक्षिणञ्च देवेशि ! यः कुर्यादमरेश्वरे ॥४०५॥
पदे पदेश्वमेधानां सहस्रं प्राप्नुयान्नरः।
ततोऽवरुह्य[3] शैलात्तु श्रयेत्संगममुत्तमम् ॥४०६॥
श्राद्धं कृत्वा विधानेन तर्पयेत् पितृदेवताः।
मोदन्ति पितरस्तस्य नृत्यन्ति च समन्ततः ॥४०७॥

---

1. ५ पंक्तियां क, ग पु० अधिक पाठ। 2. १ पंक्ति ख, ग पु० अधिक पाठ।
3. १ पंक्ति क, ख पु० अधिक पाठ।

अद्य कुर्वन्ति दायादाः संगमे श्राद्धमुत्तमं ।
चूडामणौ[1] महायोगे कुरुक्षेत्रे च तर्पणात् ॥४०८॥
यां तृप्तिं पितरो यान्ति तां यान्ति संगमे प्रिये ! ।
गा हिरण्यं सुवासांसि क्षौमं रौप्यमपीश्वरि ! ॥४०९॥
मुक्ताफलं चापि दत्त्वा याति सादाशिवं पदं ।
विशेषतः पीठदानममरेशस्य सुन्दरि ! ॥४१०॥
मुक्तिदं प्रोक्तमित्येतत् सत्यं सत्यं वरानने ! ।
भैरवी :— किमिदं पीठदानस्य शिवस्य भगवंस्त्वया ।
कथितं तन्महेशान ! वद मे हितकाम्यया ॥४११॥

जगत्पिता देवदेव के लिंग को स्पर्श करने से ही पाप की केंचुली से मुक्त होकर परम शिव पद प्राप्त किया जाता है। हे सुन्दरी ! जो फल, मोती, सोने के फूल अथवा रजतदान देने से मिलता है वह अमरेश की पूजा से ही मिलता है। हे सुन्दर मुखवाली ! मनुष्य निसंदेह मुक्ति प्राप्त कर लेता है। जो मनुष्य अमरेश की पूजा विधिपूर्वक धूप, दीप, नैवेद्य अथवा और वस्तुओं से करता है उसे यज्ञों का फल मिलता है। जो मनुष्य शंकर को घृतपूर्ण तथा तिल तैलादि से युक्त आरात्रिका (कश्मीरी आलथ) अर्पण करता है वह परम पद को प्राप्त कर लेता है। हे सुन्दरी ! जो घी तथा गुग्गुलु से युक्त धूप परिकल्पित करता है वह सब दुःखों से मुक्त होकर सदाशिव पद को प्राप्त कर लेता है। हे देवेशि ! जो अमरेश्वर की प्रदक्षिणा करता है उसे पद पद पर हजारों अश्वमेधों का फल प्राप्त होता है। अनन्तर पर्वत से उतर कर संगम पर जाना चाहिये और वहां विधिपूर्वक श्राद्ध करके पितरों तथा देवों को तृप्त करना चाहिये। उन मनुष्यों के पितर यह जानकर, कि आज हमारे दायाद संगम पर हमारा श्राद्ध करने वाले हैं—खुशी के मारे नाचने लगते हैं। उत्कृष्ट चूडामणि योग पर अथवा कुरुक्षेत्र पर तर्पण करने से पितरों को जो तृप्ति मिलती है वह संगम पर पिंडदान से मिलती है। (संगम पर) गाय, सोना, अच्छे वस्त्र, रेशम चांदी तथा मोतीदान देने से सदाशिव पद मिलता

1. २ पंक्तियां क, ख, ग पु० अधिक पाठ।

है। हे सुन्दरी! मैं यह सच कहता हूँ कि विशेष करके संगम पर अमरेश का पीठ दान में देना मुक्तिप्रद कहा गया है।

भैरवी :—हे भगवान! आपने यह शंकर के पीठदान की बात क्या कही? मेरे हितकार के लिए सम्पूर्ण बात स्पष्ट करके कहिये।

भैरव :— पलपञ्चकमादाय यवपिष्टस्य सुन्दरि!।
सचतुर्भद्रकं कृत्वा लेपयित्वा च कुङ्कुमैः ॥४१२॥
कर्पूरैश्चन्दनैश्चापि मृगजैश्च महेश्वरि!।
चतुष्कोणेषु संस्थाप्य सुवर्णानां चतुष्टयम् ॥४१३॥
मध्ये सुवर्णमेकञ्च स्थापयित्वा सुरोत्तमे!।
अथवा रौप्यमुद्राणां पञ्चकं मनुजेश्वरि! ॥४१४॥
अर्चयित्वा गन्धपुष्पैर्ब्राह्मणाय समर्पयेत्।
आधारशक्त्यादिभिर्मन्त्रैः पूजयित्वा सुवासयेत् ॥४१५॥
वस्त्रैः श्वेतपटैर्दिव्यैस्तथा यज्ञोपवीतकैः।
दक्षिणाभिश्च निष्कैश्च मन्त्रमेनं समुच्चरेत् ॥४१६॥
"यात्रा साफल्यहेतोर्हि ह्यमरेशस्य चालयं।
पीठं मयार्पितं दिव्यं सुवासोभिरलङ्कृतम् ॥४१७॥
मृत्युञ्जय महादेव! मया संसारभीरुणा।
अर्पितं त्वत्स्वरूपाय ब्राह्मणाय महात्मने ॥४१८॥
इदं गृहाण विप्रेशस्वरूपिन्! भवशासनात्।
पीठं ह्यमरनाथस्य महापापापनुत्तये ॥४१९॥
यन्मया दुष्कृतं किञ्चित्कृतं गुर्वन्यथापि वा।
भ्रूणहत्यादिकं वापि सुरापानमपीश्वर! ॥४२०॥
गुरुहत्यादिकं[1] वापि मातृहत्यादिकं च यत्।
स्वर्णस्तेयादिकं वापि सुरापानमपीश्वर! ॥४२१॥
गोहत्यानृतभाषित्वं क्रोधलोभावथापि वा।
परदाराभिगामित्वं परीवादः परस्य वा ॥४२२॥

1 १ पंक्ति क, ग, पु० अधिक पाठ।

लघुसूक्ष्मं बृहद्वापि यत्कृतं पापमुत्कटं ।
तत्सर्वं नाशमायातु पीठदानान्महेश्वर" ! ।।
इति मंत्रेण देवेशि ! पीठं विप्राय चार्पयेत् ।।४२३।।

भैरव :—हे सुन्दरी ! जौ के आटे के पांच तोलों से चौकौन पीठ बना कर उसे केसर, कपूर, चन्दन तथा कस्तूरी का लेप करना चाहिये। हे देवों में उत्तमे ! उसके चार कोणों पर चार सुवर्ण मुद्रायें तथा बीच में एक अथवा पांच चान्दी की मुद्राएँ ही रखकर, तिलक फूल से अर्चना करके ब्राह्मण को देना चाहिये। आधार शक्त्यादि मन्त्रों से पूजा करके, सफेद सुन्दर कपड़े, यज्ञोपवीत तथा दक्षिणा के लिए रुपयों से सजा कर इस मन्त्र का उच्चारण करना चाहिये।

"मैं अपनी यात्रा सफल होने के लिये अमरेश का अक्षयपीठ अच्छे वस्त्रों से सजा कर अर्पण करता हूँ। हे मृत्युञ्जय महादेव ! मैं संसार से डर कर, तुम्हारे ही स्वरूप ब्राह्मण को यह पीठ अर्पित करता हूँ। हे ब्राह्मण रूपधारी शिव ! यह अमरनाथ का पीठ मेरे पापों की निवृत्ति के लिये स्वीकृत करो। जो कुछ भी मैंने भारी अथवा हल्का, गर्भघात, ब्रह्महत्या, गुरुहत्या, मातृहत्या, सोने की चोरी, मदिरा पान, गो हत्या, झूट बोलना, क्रोध और लोभ, परस्त्रीसंग, दूसरों की निंदा अथवा और भी कोई छोटा बडा पाप किया हो वह इस पीठ के दान से निवृत्त हो जाय"।

हे देवेशि ! यह मन्त्र पढ़कर वह पीठ ब्राह्मण को अर्पण करे।

तथा मया प्रोक्तमिदं तवानघे ! ।
दानं हि पीठस्य परं रहस्यम् ।
ददस्व देवेशि ! परं किमन्यै-
र्दानैः कलौ स्वल्पफलप्रदैश्च ।।४२४।।
इदं रहस्यं परमं नाख्येयं यस्य कस्यचित् ।
गोपनीयं विशेषेण कलौ सिद्धिप्रदं नृणाम् ।।४२५।।
ततो[1] यायान्महाग्रामे मामलाख्ये महेश्वरि ! ।
महागणपतिं तत्र पूजयेद्बलिभिः प्रिये ! ।।४२६।।

1. १ पंक्ति क, ग, पु० अधिक पाठ।

विविधैर्गन्धधूपैश्च मोदकैश्च महेश्वरि ! ।
पूपोपहारैः पुष्पैश्च पूजनीयः प्रयत्नतः ॥४२७॥
प्रसाद्य गणपं तत्र नानाबल्युपहारकैः ।
प्रायान्नवदले[1] गङ्गां यष्टिं तत्रार्पयेद्बुधः ॥४२८॥
"यष्टे ! ह्याधारभूतासि साक्षिभूतासि वै यतः ।
सत्कर्मणश्च तीर्थस्य यात्रायां ननु सुन्दरि ! ॥४२९॥
यष्टे ! विष्णुप्रियासि त्वं शिवशक्तिस्वरूपिणी ।
तस्मान्मे पापसघांश्च हित्वा याहि स्वमालयम् ॥४३०॥
गङ्गे[2] ! सदैव देवस्य शिरस्थे ! धूर्जटेः प्रिये ! ।
पुरतो देवदेवस्य यात्रां मम निवेदय" ॥४३१॥
इति मन्त्रेण देवेशि ! यष्टिं गङ्गाम्बसि क्षिपेत् ।
स्नात्वा पातालगङ्गायां ततो यायात्स्वकं गृहम् ॥४३२॥
एवं कृत्वा तु देवेशि ! नारी वा पुरुषोऽपि वा ।
वेदपारायणं पुण्यं प्राप्नोत्येव न संशयः ॥४३३॥
यात्रां ह्येवंविधां कृत्वा पुण्यां ह्यमरनाथगां ।
मुक्तिमेव समाप्नोति विना चेन्द्रियनिग्रहैः ॥४३४॥
विनाध्यानैर्विना दानैर्विना यज्ञैर्महेश्वरि ! ।
इह लोके सुखं भुंक्त्वा ह्यन्ते सायुज्यमाप्नुयात् ॥४३५॥
इति गुह्यं मया ख्यातं फलं ह्यमरनाथजं ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥४३६॥

---

1. आधुनिक कस्बा त्राल से यह स्थान तीन मील की दूरी पर त्राल से श्रीनगर जाने वाली सड़क के किनारे पर स्थित है। कुछ समय पहिले यात्री अमरनाथ से लौटकर मामलेश के समीप ही एक छोटी सी पहाड़ी पार करके त्राल पहुँच जाते थे और वहां से नवदल जाकर श्राद्ध करते थे। इस पहाड़ी का कश्मीरी नाम (बुघमोर) है। आजकल तो पहलगाम से लारियों पर सीधा श्रीनगर आने के कारण यह क्रम ही लुप्तप्राय हुआ है।

2. ४ पंक्तियां ख, ग पु० अधिक पाठ।

इत्येष पटलो गुह्यो महापातकनाशनः ।
श्रुतश्च पठितश्चापि हयमेधादियागदः।।४३७।।

इति द्वादशः परिच्छेदः ।

इति शिवम् ।।

हे निष्पाप देवी ! इस प्रकार मैंने तुम्हें यह रहस्यपूर्ण पीठदान का वर्णन सुनाया। हे देवी ! तुम भी यही दान में दे दो क्योंकि कलियुग में साधारण फल देने वाले दूसरे दानों से क्या प्रयोजन है ? यह अत्यन्त रहस्य प्रत्येक व्यक्ति को नहीं कहना चाहिये। इसे विशेषरूप से गुप्त रखना चाहिये क्योंकि यह कलियुग में लोगों को परम सिद्धिदायक है। हे प्यारी ! फिर मामलक नामक पवित्र ग्राम में जाकर वहां बलियों से महागणपति की पूजा करनी चाहिये। हे महेश्वरी ! गणेश जी की पूजा अनथक प्रयत्नों से भान्ति भान्ति के तिलक, धूप, लड्डू, पूडियों के उपहार और फूलों से करनी चाहिये। अनन्तर वहां पर नाना प्रकार की बलि तथा उपहारों से गणेश को मनाकर, नवदल में वर्तमान गङ्गा पर जाना चाहिये और वहां सोटी अर्पण करनी चाहिये।

"हे दण्ड ! तू मेरे आधार बने हुए हो क्योंकि तुम प्रति समय मेरे अच्छे कर्म और तीर्थयात्रा का साक्षी हो। हे दण्ड ! तुम सृष्टिरूप होकर स्थिति और प्रलय के भी कारण हो, साथ ही विष्णु का प्रिय होकर शिवशक्ति रूप हो अतः तुम मेरे पापों का नाश करके अपने आश्रय पर चले जाओ।"

"सदैव भगवान के सिर पर रहने वाली शंकर की प्रेयसी गङ्गा ! भगवान के सामने मेरी यात्रा का निवेदन करो।"

हे देवेशि ! यह मन्त्र पढ़कर दण्ड को गङ्गा प्रवाह में बहा दे और पाताल गङ्गा में स्नान करके अपने घर को चला जाये। हे देवेशि ! स्त्री या पुरुष कोई भी ऐसा करने से वेदपाठ का फल निसंशय प्राप्त कर लेता है। इस प्रकार पवित्र अमरनाथ की यात्रा करने से इन्द्रियों

को वश में करने के बिना ही मनुष्य को मुक्ति मिलती है। हे महेश्वरी! (ऐसा करने वाला मनुष्य) ध्यान, दान तथा यज्ञ करने के बिना ही इस लोक में सुख भोग अन्त में मुक्त होता है। इस प्रकार मैंने तुम्हें अमरनाथ जी के दर्शन का यह रहस्यपूर्ण पटल सुना दिया इसको सुनकर मनुष्य करोड़ों भयङ्कर पापों से मुक्त होता है। बड़े बड़े पापों को नष्ट करने वाला यह रहस्यपूर्ण पटल सुनने से अथवा पढ़ने से ही अश्वमेध आदि यज्ञों का फल देने वाला है।

बारहवां परिच्छेद समाप्त हुआ

श्री अमरनाथ माहात्म्य समाप्त ॥

अथ अमरेश्वर पूजा प्रारभ्यते

(पानी छोडना) ओं अस्य श्री आसनशोधनमन्त्रस्य, मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता, आसनशोधने विनयोगः। मेरुपृष्ठ ऋषये नमः शिरसे (सिर को हाथों से छूना) सुतलं छन्दसे नमः मुखे (मुंह को) कूर्मो देवतायै नमः हृदि (हृदय को) आसनशोधने विनियोगाय नमः सर्वाङ्गेषु। (सब अङ्गों को)। (दो दर्भकाण्ड भूमी को आसन छोडना) ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवास: पर्वता इमे। ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि। (गन्ध अर्घ फूल देना) प्रीं पृथिव्यै आधारशक्त्यै समालभनं गन्धो नमः अर्घो नमः पुष्पं नमः। (हाथ जोड के मांगना) पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्। (अब अमरेश के स्मरण-पूर्वक नमस्कार करना) शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये। अभिप्रेतार्थसिद्ध्यर्थं पूजितोयः सुरैरपि। सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः। कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्। सदारमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि। गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः। गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः। गुरवे नमः परमगुरवे

नमः परमेष्ठिने गु० परमाचार्याय नमः आद्यसिद्धेभ्यो नमः। "न्यास करना" ॐ अङ्गुष्ठाभ्यां नमः, न तर्जनीभ्यां नमः, मः मध्यमाभ्यां नमः, शि अनामिकाभ्यां नमः, वा कनिष्ठिकाभ्यां नमः, य करतलकरपृष्ठाभ्यां नमः। "इति करन्यासः"। "अथ षडङ्गन्यासः"। ॐ हृदयाय नमः, न शिरसे स्वाहा, मः शिखायै वौषट्, शि कवचाय हुं, वा नेत्रत्रयाय वौषट्, य अस्त्राय फट्। "चारों ओर तिल फेंकना"। अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया। प्राणायामः। "मुख और पैरों को पानी से छिडकना" तीर्थे स्नेयं तीर्थमेव समानानां भवति मानः शंस्यो अरुरुषो धूर्तिः प्राणङ् मर्त्यस्य रक्ष नो ब्रह्मणस्पते। (पवित्र लगाने की महिमा) सप्तभिर्दर्भकुञ्जरैः कुर्याद्विप्रः पवित्रकं। षट् राज्ञा पञ्चभिर्वैश्यः स्त्रीशूद्राणां चतुष्टयम्। पकारः पापशमनः वकारः वशकारकः। त्रकारः त्राणं सर्वेषां पवित्रकमुदाहृतम्। यथा वज्रं सुरेशस्य यथा शूलं शिवस्य च। यथा विष्णोर्गदा चक्रे तथा ब्रह्मपवित्रकम्। "पवित्र धारना" वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्ति। "अपने आपको गन्धादिक लगाना"। स्वात्मने शिवस्वरूपाय समालभनं गन्धो नमः अर्घोनमः पुष्पं नमः। "दीप को" स्वप्रकाशो महादीपः सर्वतस्तिमिरापहः। प्रसीद मम गोविन्द दीपोयं परिकल्पितः। "धूप को"। वनस्पतिरसो दिव्यो गन्धाढ्यो गन्धवत्तमः। आघ्रेयः सर्वदेवानां धूपोयं परिकल्पितः। "सूरजको"। नमो धर्मनिधानाय नमः स्वकृतसाक्षिणे। नमः प्रत्यक्षदेवाय भास्कराय नमोनमः। "पानी छोडना"। यत्रास्ति माता न पिता न बन्धुर्भ्रातापि नो यत्र सुहृज्जनश्च। न ज्ञायते यत्र दिनं न रात्रिस्तत्रात्मदीपं शरणं प्रपद्ये। आत्मने शिवस्वरूपाय दीपधूपसङ्कल्पात्सिद्धिरस्तु दीपोनमः धूपोनमः। ॐ तत्सद्ब्रह्माऽद्यतावत्तिथावऽद्य श्रावणमासस्य शुक्लपक्षस्य महापर्वणि पूर्णपञ्चदश्यां अमुकवासरान्वितायां आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं ॐ व्वं सः अमरेश्वर प्रीत्यर्थं भवायदेवाय, शर्वायदेवाय, रुद्रायदेवाय पशुपतयेदेवाय पार्वतीसहिताय परमेश्वराय अमरेश्वराय दीपोनमः धूपोनमः। "विष्टरसहित पानी में तीन बाल फूल और गन्ध छोडना"। संव्वः सृजामि हृदयं संसृष्टं मनो अस्तु वः ॥ १ ॥ संसृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः ॥ २ ॥ संय्यावः प्रियास्तन्वः संप्रिया हृदयानि वः। आत्मा वो अस्तु संप्रियः संप्रियास्तन्वो मम ॥ ३ ॥ "वह पानी देव पर छोडना" ॐ आं ह्रीं क्रीं शिवस्य

प्राणः इह प्राणः, आं ह्रीं क्रीं शिवस्य जीवः इह जीवः स्थितः। आं ह्रीं क्रीं शिवस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणा इहागत्य सुखं चिरं तिष्ठन्तु, स्वाहा। "देव को न्यास करना" ओं अङ्गुष्ठाभ्यां नमः इत्यादि। "पृच्छा पढना" अमृतेशाय विद्महे व्योमदेहाय धीमहि तन्नोऽमरेश्वरः प्रचोदयात्। तत्सद्ब्रह्माऽद्या-तावत्०। भवस्यदेवस्य शर्वस्यदेवस्य रुद्रस्य देवस्य पशुपतेर्देवस्य उग्रस्य देवस्य भीमस्य देवस्य महादेवस्य ईशानस्य पार्वतीसहितस्य परमेश्वरस्य अमरेश्वरपूजनं अर्चामहं करिष्ये ओं कुरुष्व। यवान्विकीर्य। "आसन देना"। विश्वेश्वर महादेव राजराजेश्वरेश्वर। आसनं दिव्यमीशानं दास्येहं परमेश्वर। भवस्यदेवस्य० इदमासनं नमः। "आवाहन करना"। भवायदेवाय० युष्मान्वः पूजयामि ओंपूजय। भवंदेवं शर्वंदेवं रुद्रंदेवं पशुपतिंदेवं उग्रंदेवं भीमंदेवं महादेवं ईशानंदेवं पार्वतीसहितं परमेश्वरं आवाहयिष्यामि ओंमावाहय। आयाहि भगवञ्छम्भो सर्वेश गिरिजापते। प्रसन्नो भव देवेश नमस्तुभ्यं हि शंकर। लिङ्गेऽत्र भक्तदयया क्षणमात्रमेकं स्थानं विधाय भव मद्विहितां पुरारे। सर्वेश विश्वमय हृत्कमला-धिरूढः पूजां गृहाण भगवन्भव मेऽद्य तुष्टः। भूमेर्जलात्तु पवनादनलाद्धिमांशोरुष्णांशुतो हृदयतो गगनात्समेत्य। लिङ्गेऽत्र सन्मणिमये मदनुग्रहार्थं भक्त्यैकलभ्य! भगवन्कुरु सन्निधानम्। भगवन्पार्वतीनाथ! भक्तानुग्रहकारक। अस्मद्दया-नुरोधेन सन्निधानं कुरु प्रभो!॥ ३॥ इत्याहूय तु गायत्रीं त्रिः समुच्चार्य तत्त्ववित्। मनसा चिन्तितैर्द्रव्यैर्देवमात्मनि पूजयेत्। तेजोरूपं ततः क्षिप्त्वा प्रतिमायां पुनर्यजेत्। प्राणायामः। पाद्यार्थं उदकं नमः। "पानी हाथसे पात्र में वापस छाडना"। शन्नोदेवीरभिष्टय आपो भवन्तु पीतये, शंय्योरभिस्त्रवन्तु नः। "यह द्रव्य उसमें छोडना" लाजाश्च कुङ्कुमं चैव सर्वौषधिसमन्वितम्। दर्भाङ्कुरं जलं चैव पञ्चाङ्गं पाद्यलक्षणम्। भगवन् पाद्यं॥ २॥ महादेव महेशान महानन्द परात्पर। गृहाण पाद्यं मद्दत्तं पावतीसहितेश्वर। भवायदेवाय० पाद्यंनमः। "पाद्यशेष छोडना"। पुनः शन्नोदेवी०। "यह द्रव्य छोडना" आपः क्षीरं कुशाग्राणि घृतं च दधि तण्डुलाः। यवा सिद्धार्थकाश्चेति ह्यर्घ्यमष्टाङ्गमुच्यते। भगवन् अर्घ्यं॥ २॥ त्र्यम्बकेश सदाधार विपदां प्रतिघातक। अर्घ्यं गृहाण देवेश सम्पत्सर्वार्थसाधक। भवदेव शर्वदेव रुद्रदेव पशुपते देव उग्रदेव भीमदेव महादेव ईशानदेव पार्वतीसहित परमेश्वर इदं वोऽर्घ्यं नमः। त्रिपुरान्तक दीनार्तिनाश श्रीकण्ठ तुष्टये। गृहाणाचमनं देव पवित्रोदककल्पितम्। भवायदेवाय०

आचमनीयं नमः। त्रिकालकालकालेश संहारकरणोद्यत स्नानं तीर्थाहृतैस्तोयैर्गृहाण परमेश्वर। भवाय देवाय० मन्त्रस्नानीयं नमः। पानीयान्तरितैः पयोदधिघृतैः चौद्रेक्षुभिः सौषधैर्व्रीह्यद्भिः कुसुमोदकैः फलजलैः सिद्धार्थलाजोदकैः। गन्धाद्भिः शुभहेमरत्नसलिलैरित्थं सदा चोत्तमैर्दद्यात्पञ्चदशाम्बुना सह महास्नानानि शम्भोः क्रमात्। असंख्याताः सहस्राणि ये रुद्रा अधि भूम्याम्। तेषां सहस्रयोजनेव धन्वानि तन्मसि ॥ १ ॥ येऽस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि। तेषां सह० ॥ २ ॥ ये नीलग्रीवा शितिकण्ठा दिवं रुद्रा उपाश्रिताः। तेषां० ॥ ३ ॥ ये नीलग्रीवाः शितिकण्ठा शर्वा अधः क्षमाचराः। तेषां० ॥ ४ ॥ ये वनेषु शिल्पिञ्जरा नीलग्रीवा विलोहिताः। तेषां० ॥ ५ ॥ येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्। तेषां० ॥ ६ ॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः। तेषां० ॥ ७ ॥ ये पथीनां पथि रक्षय ऐडमृदाय व्युधः। तेषां० ॥ ८ ॥ ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः। तेषां० ॥ ९ ॥ य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितस्थिरे। तेषां० ॥ १० ॥ ॐनमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥१॥ ॐनमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश० ॥२॥ ॐनमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो० ॥३॥ भवाय देवाय० पञ्चदशस्नानानि नमः। ॐनमोदेवेभ्यः "कण्ठोपवीती" स्वाहा ऋषिभ्यः। "अपसव्येन"। स्वधा पितृभ्यः "सव्येन" आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं जगत्तृप्यतु ॥३॥ एवमस्तु। "फिर पात्रमें पानी 'ॐनमः शिवाय' इस मन्त्र से सात बार मन्त्रित करके अपने माथेतक लेकर अमृतसे भराहुआ ध्यान करके देवके सिरपर छोडना। इसको मन्त्रगुडक कहते हैं"। "आरात्रिका निकालना' गृह्णन्तु भगवद्भक्ता भूताः प्रसादबाह्मगाः। पञ्चभूताश्च ये भूतास्तेषामनुचराश्च ये। ते तृप्यन्तु वौषट्। "देवके पादोंका पानी नेत्रोंको मलना"। भगस्य हृदयं लिङ्गं लिङ्गस्य हृदयं भगः। तस्मै ते भगलिङ्गाय उमारुद्राय वै नमः। उत्तिष्ठ भगवञ्छम्भो उत्तिष्ठ गिरिजापते। उत्तिष्ठ त्रिजगन्नाथ त्रैलोक्ये मङ्गलं कुरु। "शम्भू बिठाने की जगह पर फूल छोडते हुए पढना" आसनाय नमः पद्मासनाय नमः। वृषभासनाय नमः ज्ञानासनाय नमः। किमासनं ते वृषभासनाय किंभूषणं वासुकिभूषणाय। वित्तेशभृत्याय किमस्ति देयं वागीश किं ते वचनीयमस्ति। "महिम्नः पारस्तोत्र पढते हुए

देवको चन्दनादिद्रव्यों से अनुलेपन करना"। "वस्त्र पहनना"। कालाग्निरुद्र सर्वज्ञ वरदाभयदायक। वस्त्रं गृहाण देवेश दिव्यवस्त्रोपशोभित। भवाय दे-वाय० वस्त्रं परिकल्पयामि नमः। "जन्मू पहनना"। सुवर्णतारैरचितं दिव्य-यज्ञोपवीतकम्। नीलकण्ठ मया दत्तं गृहाण परमेश्वर। भवाय दे० यज्ञो-पवीतं परिकल्पयामि नमः। "गन्ध चडाना"। सर्वेश्वर जगद्वन्द्य दिव्यासन-सुसंस्थित। गन्धं गृहाण देवेश दिव्यगन्धोपशोभितम्। भवाय० समालभनं गन्धो नमः। "अक्षत और फूल चडाना"। सदाशिव शिवानन्द प्रधानकरणेश्वर। पुष्पाणि बिल्वपत्राणि विचित्राणि गृहाण मे। भवाय दे०। अनन्ताय नमः। सूक्ष्माय शिवोत्तमाय एकनेत्राय एकरुद्राय त्रिमूर्तये श्रीकण्ठाय शिखण्डिने नन्दिने महाकालाय नमः। अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्। गणपतये नमः वृषभाय कुमाराय अम्बिकायै चण्डे-श्वराय नमः। अभीष्ट० द्वितीयावर०। इन्द्राय वज्रहस्ताय अग्नये शक्तिहस्ताय यमाय दण्डहस्ताय नैर्ऋतये खड्गहस्ताय वरुणाय पाशहस्ताय वायवे ध्वजहस्ताय कुबेराय गदाहस्ताय ईशानाय त्रिशूलहस्ताय ब्रह्मणे पद्महस्ताय विष्णवे चक्र-हस्ताय नमः। अभीष्ट० तृतीयाव०। जयायै नमः विजयायै सुभगायै दुर्भगायै जयन्त्यै कुहिन्यै अपराजितायै करालयै नमः। अभिष्टसि० चतुर्था०। सूर्याय नमः चन्द्रमसे भौमाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे। अभिष्ट० पञ्चमा०। अनन्तनागराजाय नमः वासुकिनाग० तक्षकना० पद्म० महापद्म० कार्कोट० शङ्खपाल० कुलिक०। अभीष्ट० षष्ठमाव०। वज्राय फट् नमः शक्तये फ० दण्डाय० खड्गाय० पाशाय० ध्वजाय० गदायै० त्रिशूलाय० पद्माय० चक्राय फट्नमः। अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं सप्तमावरणार्चदम्। शिवाय अमृतेश्वराय सपरिवाराय सानु-चराय अर्घो नमः पुष्पं नमः। "धूप चडाना"। महादेव मृडानीश जगदीश निरञ्जन। धूपं गृहाण देवेश सज्यं गुग्गुलुकल्पितम्। भवाय धूपं परिकल्प-यामि नमः। "रत्नदीप चडाना"। हिरण्यबाहो सेनानीरोषधीनां पते शिव। दीपं गृहाण कर्पूरकपिलाज्यत्रिवर्तिकम्। भवाय० रत्नदीपं परिकल्पयामि नमः। मयूरपुच्छैर्देवेश शुभ्रैश्चामरकैस्तथा। ध्वजं छत्रं वीजनं च गृहाण परमेश्वर। "चामर करना"। जय सर्वजनाधीश जय गौरीपते शिव। जय देव महा-देव जयगङ्गाधरेश्वर। जय दग्धपुराध्यक्ष जय कालान्तकारक। जय काम-

विरामेश जय भक्तानुकम्पक। जय त्रैलोक्यसंरक्षिन् जय निर्गुण सद्गुण। जयानन्तगुणारम्भ जय घोर महेश्वर। जय चन्द्रकलाकान्त जय नागेन्द्रभूषण। जय पुङ्गवसत्केतो जय त्र्यक्ष महेश्वर। जयान्तकरिपो शम्भो जय ब्रह्मादिकारण। जय पञ्चकलातीत जय शूलिन्कपालभृत्। जयोपेन्द्रचन्द्राद्य जय नन्द्यादिवन्दित। जयानेकगणाधीश जय स्वामिन् महेश्वर। जय विश्वाद्य विश्वेश जय विश्वैककारण। जय विश्वसृजां मुख्य जय विश्वस्य सद्गुरो। जय निरामय जय सुधामय जय धृतामृतदीधिते, जय हतान्तक जय कृतान्तक जय पुरान्तक सद्गते। जय परापर जय दयापर जय नतार्पितसद्गते जय जितस्मर जय महेश्वर जय जय त्रिजगद्रते। इति जयस्तुतिः। व्याप्तचराचरभावविशेषं चिन्मयमेकमनन्तमनादिम्। भैरवनाथमनाथशरण्यं त्वन्मयचित्ततया हृदि वन्दे ॥१॥ त्वन्मयमेतदशेषमिदानीं भाति मम त्वदनुग्रहशक्त्या। त्वं च महेश सदैव ममात्मा स्वात्ममयं मम तेन समस्तम् ॥२॥ स्वात्मनि विश्वगते त्वयि नाथे तेन न संसृतिभीतिकथास्ति। सत्स्वपि दुर्धरदुःखविमोहत्रासविधायिषु कर्मगणेषु ॥३॥ अन्तक मां प्रति मा दृशमेनां क्रोधकरालतमां विदधीहि। शङ्करसेवनचिन्तनधीरो भीषणभैरवशक्तिमयोऽस्मि ॥४॥ इत्थमुपोढभवन्मयसंविद्दीधितिधारितभूरितमिस्रः। मृत्यु यमान्तक कर्म पिशाचैर्नाथ नमोऽस्तु न जातु बिभेमि ॥५॥ प्रोदितसत्यविबोधमरीचिप्रोक्षितविश्वपदार्थसतत्त्वः। भावपरामृतनिर्भरपूर्णे त्वय्यहमात्मनि निर्वृतिमेमि ॥६॥ मानसगोचरमेति यदैव क्लेशदशाऽतनुतापविधात्री। नाथ! तदैव मम त्वदभेदस्तोत्रपरामृतवृष्टिरुदेति ॥७॥ शंकर सत्यमिदं व्रतदानस्नानतपो भवतापविनाश। तावकशास्त्रपरामृतचिन्ता स्यन्दति चेतसि निर्वृतिधाराः ॥८॥ नृत्यति गायति हृष्यति गाढं संविदियं मम भैरवनाथ। त्वां प्रियमाप्य सुदर्शनमेकं दुर्लभमन्यजनैः समयज्ञम् ॥९॥ वसुरसपौषे कृष्णदशम्यामभिनवगुप्तः स्तवमिमकरोत्। येन विभुर्भवमरुसन्तापं शमयति झटिति जनस्य दयालुः ॥१०॥ इत्यऽभिनवोक्तभैरवस्तुतिः। अतिभीषणकटुभाषणयमकिंकरपटलीकृतताडनपरिपीडनमरणागमसमये। उमया सह मम चेतसि यमशासन निवसञ्छिव शंकर शिव शंकर हर मे हर दुरितम् ॥१॥ अतिदुर्नयचटुलेन्द्रियरिपुसञ्चयदलिते पविकर्कशकटुजल्पितखलगर्हणचलिते। शिवया सह मम चेतसि शशिशेखर निवसञ्छिव० ॥२॥ भवभञ्जन सुररञ्जन खलवञ्चन पुरहन् दनुजान्तक मदनान्तक रविजान्तक भगवन्। गिरिजावर करुणाकर परमेश्वर भयहञ्छिव

श० ॥३॥ शक्रशासन कृतशासन चतुराश्रमविषये कलिविग्रह भवदुर्ग्रह रिपु-दुर्बलसमये। द्विजक्षत्रियवनिताशिशुदरकम्पितहृदये शिव० ॥४॥ भवसंभवविविधामयपरिपीडितवपुषं दयितात्मजममताभरकलुषीकृतहृदयम्। कुरु मां निजचरणार्चननिरतं भव सततं शिव० भवाय० चामरं परिकल्पयामि नमः। नवरत्नमयंदिव्यं मुक्ताहारविभूषितम्। गृहाण छत्रं भगवंश्चित्रभद्रासनमिदम्। भवाय० छत्रं प०। "आईना दिखाना"। यस्य दर्शनमात्रेण विश्वं दर्पणविम्बवत्। तस्मै ते परमेशाय मुकुरं कल्पयाम्यहम्। भवाय० आदर्शं परिकल्पयामि नमः। एताभ्यो देवताभ्यः दीपो नमः धूपो नमः। वासोनमः। क्षेमप्रदायकंसर्वक्षेत्रसारस्वतप्रदम्। गृहाण क्षौमवस्त्रं त्वं महेश करुणानिधे। अमरेश्वरस्य सानुचरस्याऽर्घ्यदानाद्यऽर्चनविधिः सर्वः परिपूर्णोऽस्तु। "मधुपर्क देना"। क्षीराज्यमधुसंमिश्रं शुभ्रदध्ना समन्विम्। षड्रसैश्च समायुक्तं गृहाणान्नं निवेदये। भवाय० चरुं परिकल्पयामि नमः। "फूलोंकी अञ्जली चडाना"। हर विश्वाखिलाधार निराधार निराश्रय। पुष्पाञ्जलिमिमं शम्भो गृहाण वरदो भव। भवाय० पुष्पाञ्जलिं समर्पयामि नमः। "फल चडाना"। राजराजाभिदेवेश निराधार निरास्पद। फलं गृहाण मद्दत्तं नारिकेलादिकं शुभम्। भवाय फलं समर्पयामि नमः। "ताम्बूल चड़ाना"। शाश्वतात्मन्महानन्द मदनान्तक धूर्जटे। गृहाण पूगताम्बूलदलपत्रादिसंयुतम्। भवाय० ताम्बूलं परि०। "आधा प्रक्रम देना"। यानि कानि च पापानि ब्रह्महत्यादिकानिच। तानि सर्वाणि नश्यन्ति शिवस्यार्धप्रदक्षिणात्। "षडक्षरपञ्चाक्षर स्तोत्र पढकर अष्टाङ्ग प्रणाम देना"। मृडानीशाद्य मे सर्वानपराधानऽनेकशः। क्षम स्वामिन्प्रणामं मे गृहाणाष्टाङ्गसंयुतम्। उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा उरसा मनसा वचसा च नमस्कारं करोमि नमः। अन्नं नमः २ आज्यं २ अद्यदिनेऽद्ययथासङ्कल्पात्सिद्धिरस्तु अन्नहीनं क्रियाहीनं विधिहीनं द्रव्यहीनं मन्त्रहीनं च यद्गतं तत्सर्वमऽच्छिद्रं सम्पूर्णमस्तु एवमस्तु। शन्नो देवी० भवाय० अपोशानं नमः। पुनः शन्नो देवी० भवाय० दक्षिणायै तिलहिरण्यरजतनिष्कर्णं ददानि। एता देवताः सदक्षिणान्नेन प्रीयन्तां प्रीताः सन्तु। "नैवेद्य देना"। अमृतेशमुद्रयाऽमृतीकृत्याऽमृतमस्तु अमृतायतां नैवेद्यं सावित्राणि सावित्रस्य दवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादधे। भवाय० वासुदेवादिभ्यो विष्णुपञ्चायतन देवताभ्यः इन्द्रादिभ्यो दशलोकपालेभ्यः आदित्यादिभ्य एकादशग्रहेभ्यः कुलनागदे० पञ्चचत्वारिंद्वा-

स्तोष्यति यागदेवताभ्यः धूभ्यः उपर्युभ्यः महागायत्र्यै, सावित्र्यै, सरस्वत्यै हेरुकादिभ्यो वटुकादिभ्यः हर शम्भो महादेव विश्वेशामरवल्लभ ! शिव शंकर सर्वात्मन्नीलकण्ठ ! नमोऽस्तुते। तत्सद्ब्रह्म० नमो नैवेद्यं निवेदयामि नमः। आकाशमातृभ्यो बलिं नमः समालभनं गन्धो नमः। अर्घो नमः। पुष्पं नमः। कर्पूरगौरं० भवाय० फलादि समर्पयामि नमः। क्षां क्षेत्राधिपतयेऽन्नं नमः रां राष्ट्राधिपतयेऽन्नं नमः। सर्वाभयवरप्रदाः मयि पुष्टिं पुष्टिपतिर्दधातु। "नित्यकर्म करके पूजा करना"। अमृतेशाय विद्महे व्योमदेहाय धीमहि तन्नोऽमरेश्वरः प्रचोदयात् ३। ॐ तत्सद्ब्रह्माऽद्य तावत्० भवत्य देवस्य० अच्छिद्रं सम्पूर्णमस्तु एवमस्तु। एताभ्यो देवताभ्यो यथोदकं नमः उदकतर्पणं नमः। आपन्नोस्मि शरण्योसि सर्वाऽवस्थासु सर्वदा। भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतम्। "क्षमापण पढना"। नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय। देवाधिदेवाय दिगम्बराय तस्मै नकाराय नमःशिवाय ॥१॥ मातङ्गचर्माम्बरभूषणाय समस्तगीर्वाणगणार्चिताय। त्रैलोक्यनाथाय पुरान्तकाय तस्मै मकारा० ॥२॥ शिवामुखाम्भोजविकासनाय दक्षस्य यज्ञस्य विनाशकाय। चन्द्रार्कवैश्वानरलोचनाय तस्मै शिकारा० ॥३॥ वसिष्ठकुम्भोद्भवगौतमादिमुनीन्द्रवन्द्याय गिरीश्वराय। श्रीनीलकण्ठाय वृषध्वजाय तस्मै वकारा० ॥४॥ यज्ञस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय। नित्याय शुद्धाय निरञ्जनाय तस्मै यकाराय० ॥५॥ इति। ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः। कामदं मोक्षदं चैव ॐकारं तं नमाम्यहम् ॥१॥ न जातो न मृतो यश्च क्षयो यस्य न विद्यते। नमन्ति दैवताः सर्वे नकारं तं० ॥२॥ महादेवं महावक्त्रं महाध्यानपरायणम्। महापापहरं देवं मकारं तं० ॥३॥ शिवात्परतरो नास्ति शिवशास्त्रेषु निश्चयः। शमन्ति सर्वपापानि शिकारं० ॥४॥ वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम्। वामे शक्तिधरं देवं वकारं तं० ॥५॥ यत्र तत्र स्थितो देवः सर्वव्यापी महेश्वरः। यो गुरुः सर्वदेवानां यकारं तं० ॥६॥ ॐकारं कर्मचक्रेषु नकारं नाभिमण्डले। मकारं हृदये देशे शकारं कण्ठभूषणम्। वकारं वक्त्रमध्ये तु यकारं ब्रह्मरन्ध्रगम्। एवं षडक्षरस्तोत्रं यः पठेच्छिवसन्निधौ। शिवलोकमवाप्नोति शिवेन सह मोदते ॥ इति पञ्चाक्षरषडक्षरशिवस्तुतिः।

जयत्यनन्यसामान्यप्रकृष्टगुणवैभवः। संसारनाटकारम्भनिर्वाहनकविः शिवः। ॐनमः शिवाय भूतभव्यभाविभावभाविने। ॐनमःशिवाय मातृमान-

मेयकल्पनाजुषे । ॐनमः० भीमकान्तशान्तशक्तिशालिने । ॐ०शाश्वताय शङ्कराय शम्भवे । ॐ० निर्निकेतनिःस्वभावमूर्त्तये । ॐ०निर्विकल्पनिष्प्रपञ्चसंविदे । ॐ० निर्विवादनिष्प्रमाणसिद्धये । ॐ० निर्मलाय निष्कलाय वेधसे । ॐ० पार्थिवाय गन्धमात्रसंविदे । ॐ० षड्रसाद्यसाम्यरस्यतृप्तये ॥१०॥ ॐ० तैजसाय रूपितानिरूपिणे । ॐ०पावनाय सर्वभावसंस्पृशे । ॐ० नाभसाय शब्दमात्ररागिणे । ॐ० निर्गलन्मलव्यपायि पायवे । ॐ०विश्वसृष्टिसौष्ठवैकमेधसे । ॐ०सर्वतः प्रसारिपादसम्पदे । ॐ० विश्वभोग्यभोगयोग्यपाणये । ॐ० वाचकप्रपञ्चवाच्यवाचिने । ॐ० नस्यगन्धसर्वगन्धबन्धवे । ॐ० पुद्गलालिलोलकाग्रशालिने ॥२०॥ ॐ०-चाक्षुषाय विश्वरूपसन्दृशे । ॐ० तद्गुणत्रयविभागभूतये । ॐ० पौरुषाय भोक्तृदाय मानिने । ॐ० सर्वतो नियन्तृतानियामिने । ॐ० कामभेदकल्पनोपकल्पिने । ॐ० किञ्चिदेव वस्तुताकरासृजे । ॐ० किञ्चिदेव वेत्तृतोपपादिने । ॐ० सर्वभोग्यवर्धनोपरागिणे । ॐ० शुद्धविद्यतत्त्वमन्त्ररूपिणे । ॐ० दृक्त्रयाविकस्वरेशात्मने ।३०। ॐ० सर्ववित्प्रभो सदाशिवाय ते । ॐ० वाच्यवाचकादिषट्कभित्तये । ॐ० वर्णमंत्रसत्पदोपपादिने । ॐ पञ्चधा कलाप्रपञ्चपञ्चिने । ॐ०सौरजैनबौद्धशुद्धभागिने । ॐ०भक्तिमात्रलभ्यदर्शनाय ते । ॐ०सर्वतो गरीयसां गरीयसे । ॐ० सर्वतो महीयसां महीयसे । ॐ०सर्वतः स्थवीयसां स्थवीयसे । ॐ०तुभ्यमस्त्वणीयसामणीयसे ॥४०॥ ॐ०मन्दराद्रिकन्दराधिशायिने । ॐ० जाह्नवीजलोज्ज्वलाभजूटिने । ॐ भालचन्द्रचन्द्रिकाकिरीटिने । ॐ०सोमसूर्यवह्निमात्रनेत्र ते । ॐ०कालकूटकण्ठपीठसुश्रिये । ॐ० धर्मरूपपुङ्गवध्वजाय ते । ॐ०भस्मधूलिशालिने त्रिशूलिने । ॐ०सर्वलोकपालिने कपालिने । ॐ० सर्वदैत्यमर्दिने कपर्दिने । ॐ० नित्यनम्रनाकिने पिनाकिने ॥५०॥ ॐ० नागराजहारिणे विहारिणे । ॐ० शैलजाविलासिने सुखासिने । ॐ० मन्मथप्रमाथिने पुरमुषे । ॐ०कालदेहदाहयुक्तिकारिणे । ॐ० नागकृत्तिवाससेऽम्बरवाससे । ॐ०भीषणश्मशानभूमिवासिने । ॐ पीठशक्तिपीठकोपपादिने । ॐ०सिद्धमन्त्रयोगिने वियोगिने । ॐ०सर्वदृक्चतुर्नयादिकारिणे । ॐ० सर्वतीर्थतीर्थताविधायिने ।६०। ॐ०साङ्गवेदतद्विचारचारवे । ॐ० षट्पदार्थषोडशार्थवादिने । ॐ० सांख्ययोगपाञ्चरात्रपञ्चिने । ॐ० धातृविष्णुशर्वकादिरूपिणे । ॐ० धातृविष्णु प्रमुखात्मरूपिणे । ॐ० भोग्यदाय भोग्यभोगरूपिणे । ॐ०पारगाय पारणाय मन्त्रिणे । ॐ०पारमार्थपार्थिवस्वरूपिणे । ॐ० सर्वमण्डलाधिपत्यशालिने । ॐ०सर्वशक्तिवासनानिवासिने ॥७०॥ ॐ०

सर्वतन्त्रवासनारसात्मने। ओं० सर्वमन्त्रदेवतानियोगिने। ओं० स्वस्थिताय नित्य-कर्ममालिने। ओं० कालकल्पकल्पिने सुतल्पिने। ओं० भक्तकाय सौख्यदाय शम्भवे। ओं० भूर्भुवःस्वरात्मलक्ष्यलक्षिणे। ओं० शून्यभावशान्तरूपधारिणे। ओं०सर्वभावशुद्धबुद्धिहेतवे। ओं०सर्वसिद्धदायिने सुमायिने। ओं०भक्तिमात्रसंस्तुताय शूलिने ॥८०॥ ओंनमः शिवाय भास्वते। ओं०भर्ग ते। ओं०शर्व ते। ओं०गर्व ते। ओं०खर्व ते। ओं०पर्व ते। ओं०रुद्र ते। ओं०भीम ते। ओं० विष्णवे। ओं०जिष्णवे ।९०। ओं०धन्विने। ओं०खड्गिणे। ओं०चर्मिणे। ओं०वर्मिणे। ओं० कर्मिणे। ओं०धर्मिणे। ओं०भामिने। ओं०कामिने। ओं०योगिने। ओं०भोगिने। ओं०तिष्ठते। ओं गच्छते। ओं०हेतवे। ओं०सेतवे। ओं०सर्वतः। ओं०सर्वशः। ओं०सर्वदा। ओं०सर्वथः ॥१०८॥ भव शर्व रुद्रहर शंकर भूतपते गिरिश भर्ग शशिशेखर नीलगल। त्रिनयन वामदेव गिरिजाधव माररिपो जयजय देवदेव भगवन्भवतेऽस्तु नमः। एतामष्टोत्तरशतनमस्कारसंस्कारपूतां भूतार्थव्याहृतिनुति-मुदाहृत्य मृत्युञ्जयस्य। कश्चिद्विद्वान्यदिह कुशलं सञ्चिनोति स्म किञ्चित्तेनान्ये-षां भवति पठतामीप्सितार्थस्य सिद्धिः॥ आह्वानं नैव जानामि नैव जानामि पूजनम्। पूजाभागं न जानामि क्षम्यतां परमेश्वर। उभाभ्यामिति अष्टाङ्ग-प्रणामं करोमि नमः। "तर्पण करना" नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम औषधीभ्यः नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि। इत्येतासामेव देवतानां सलोकतां सायुज्यं सार्ष्टिं सामीप्यमाप्नोति य एवं विद्वान् स्वाध्यायमधीते। पूजितोसि मया भक्त्या भगवन्गिरिजापते। सगौरीको मम स्वान्तं विश विश्रान्तिहेतवे। मनस्यान्तर्गतं मन्त्रं मन्त्रस्यान्तर्गतं मनः। मनो-मन्त्रमयं दिव्यमेकपुष्पं शिवार्चनम्॥

पुष्पाणि सन्तु तव देव! ममेन्द्रियाणि
धूपो गुरुर्वपुरिदं हृदयं प्रदीपः!।
प्राणाः हवींषि करणानि तवाक्षतास्ते
पूजाफलं व्रजतु साम्प्रतमेष जीवः।
वाञ्छामि नाहमपि सर्वधनाधिपत्यं
न स्वर्गभूमिमचलां न पदं विधातुः।
भूयो भवामि यदि जन्मनि जन्मनि स्यां
त्वत्पादपङ्कजलसन्मकरन्दभृङ्गः।

जन्मानि संतु मम देव ! शताधिकानि ;
माया च मे विशतु चित्तमबोधहेतुः ।
किञ्च क्षणार्धमपि त्वच्चरणारबिन्दा-
न्नापैतु मे हृदयमीश ! नमो नमस्ते ॥

इति अमरेश्वर पूजा सम्पूर्णा

अथ नवदल श्राद्धविधिः

भाबदि चतुर्थ्यां नवदलश्राद्धं कुर्यात् ।

ब्रह्मकलशे प्रधानं । असंख्याता० १० ऋचा यो रुद्रो० । भवाय देवाय० तद्विष्णोः, पंचायतन देवताभ्यो नमः । क्षेत्रेशौ हेरुकः वटुकः । 'यजमानमानीय' तीर्थस्नेयं० धूपदीपौ० । भवाय देवाय० विष्णुपंचायतनदेवताभ्यः अमरनाथयात्रासाफल्यार्थं समस्तपितॄणां मुक्तिप्राप्त्यर्थं नवदलश्राद्ध निमित्तं धूपो नमः दीपो नमः । गायत्र्यै नमः ३ तत्पुरुषायविद्महे । व्योमदेहाय धीमहि । तन्नोऽमरेश्वरः प्रचोदयात् ३ तत्सत्० भवस्य देवस्य विष्णुपञ्चायतन देवतानां श्रीअमरनाथयात्रासाफल्यार्थं समस्तपितॄणां मुक्तिप्राप्त्यर्थं नवदल श्राद्धनिमित्तं कलश पू० अर्चामहं करिष्ये ॐ कुरुष्व । दक्षिणान्तं कुर्यात् । ततोऽग्निकर्म, यवचरुणा । (अवसरानुसारं अन्नचरुणा अपि श्राद्धं कुर्यात्) । पात्रं तिला० । परिसमूह्य० । पुरस्ता० । वैश्वदेवस्य सिद्धस्य० । पूर्वाग्रान्दर्भानास्तीर्य । तक्षादिभ्यो बलिः । (अपसव्येन) समस्तमाता० अन्नंस्वधा० हिमं हिमं रजतं रजतम् । (सव्येन) वसन्ताय० । भगवन् यक्ष्म० । (कण्ठोपवीती) सनकादयः । अग्नये स्विष्टकृते स्वाहा । विमुञ्चामि० । नयामि० (ततः श्राद्धम्) आचम्य गायत्र्यै नमः ३ तत्पुरुषाय० ३ । (अपसव्येन) अद्यतावत्० समस्तमातापितॄणां द्वादशदैवतानां, तेषां परलोके मुक्तिप्राप्त्यर्थं अमरनाथयात्रा साफल्यार्थं नवदलश्राद्धनिमित्तं अर्चामहं करिष्ये । ॐ कुरुष्व (तिलान्विकीर्य) समस्त० आसनम् । समस्त० ब्राह्मणं त्वां पूजयामि । ॐ पूजय । निहन्मि० । सव्येन । (विश्वेदेवौ ध्वनिरुचकनामानौ पूजनीयौ) । विश्वेदेवानां ध्वनिरुचकयोः आसनं० । विश्वेभ्यो देवेभ्यो ध्वनिरुचकाभ्यां ब्राह्मणं त्वां पूजयामि । ॐ० पूजय । पाद्यार्घ्यगन्धपुष्पादि । आपः प्रदाय० । (अपसव्येन) समस्तमाता० इदमासनं स्वधा । समस्तमाता० ब्रह्मणं त्वां पूजयामि ॐ पूजय । श्राद्धानु-

वाकौ०। यास्तिष्ठन्ति० ३ समस्त पाद्यं स्वधा। (आचम्य)। यास्तिष्ठन्ति ६। समस्त० अर्घ्यं स्वधा। गन्धः स्वधा (आचम्य) अर्घपुष्पधूपदीपवासांसिस्वधा। (सव्येन) शुन्द्धतां लोकाः०। (अपसव्येन) पितृषदनं०। (सव्येन) इदमन्नं० इदं० देवेभ्यः शृतमभिघार्य। (अपसव्येन) इदमन्नं पितृभ्यः शृतमभिघार्य मेक्षणं न भवति। अग्नौ करवाणि० पात्रेषु निक्षिपेत्० (सव्येन) विश्वेभ्यो देवेभ्यः अन्नं नमः०। अन्नमधुमधू, नमो देवेभ्यः०। (अपसव्येन) समस्त० अन्नं स्वधा० अन्नमधुमधू। अद्य दिने०। (सव्येन) विश्वेभ्यो देवेभ्यः अपोशानं० (अपसव्येन) यास्तिष्ठन्ति० समस्त० अपोशानं० तिलमन्नं०। ब्रह्मार्पणं। यास्तिष्ठन्ति० समस्त अवनीजनं० तिलास्तोयं०। (पिंडदानम्) समस्तमाता० पिंडदानं कुर्यात्। मूलपुरुषाः ये लुप्तपिंडाः पितरोऽस्मदीयाः गर्भादिनष्टा जलभूमिमग्नाः। ते तृप्तिभाजः पररूपयुक्ताः पापैर्विमुक्तास्त्रिदिवं प्रयान्तु। आमगर्भेभ्यो लुप्तपिण्डेभ्यः अपः उपस्पृश्य। समस्त० वासोवीरान्नगन्ध पुष्पधूपदीपभक्ष्यभोज्य हिमपानादि स्वधा। (सव्येनाचम्य) वसन्ताय०। (अपसव्येन) ऊर्जं वहन्ति०। (सव्येन) मा मे क्षेष्ठा०। नैवेद्यं०। (अपसव्येन) सर्वमन्नं०। (सव्येन) असोमपाः०। (अपसव्येन) आचम्य। समस्त० आचमनी०। (सव्येन) विश्वेभ्यो देवेभ्यः आचमनी। (अपसव्येन) यन्मे रामाः०। समस्त० दक्षिणा। (सव्येन) धातारौ० विश्वेभ्यो दे० दक्षिणा। शन्नो भवन्तु०। वाजे वाजे०। आमा वाजस्य०। (सव्येन) गायत्र्यै नमः ३ तत्पु० (अपसव्येन) समस्त० अच्छिद्रं०। (नदीजले अवतरेत्) समस्त० तिलोदकं० ततो गोग्रासादि० आयु प्रजां०। कलशस्याच्छिद्रं०। पात्राणि० आचम्य उदकलशं०। इति नवदल श्राद्धविधिः।

अथ तृणपादुकादानमन्त्रः—

पदे पदे साक्षिभूत तृणपाद मुनिप्रिय!।
त्वं गत्वा प्रेतलोकेषु पाददाहं निवारय॥

उपानत् (जूता)

उपानहं प्रदास्यामि शिलाकण्टकरक्षणं।
पादसंरक्षणार्थं हि गृहाण त्वं सुखाय च॥

यष्टिः (दण्ड)

दधीचिकीकसाज्जाता यष्टिरेषा शुभावहा।

अचला विषमा यत्र तत्र मेऽस्तु सुखप्रदा।
यष्टिर्दण्डं मया दत्तं विप्रहस्ते जनार्दन
ब्रह्मरुद्रादयो देवा दाने प्रीतास्तु मे सदा।
दिवाकरसुतो मेऽस्तु किङ्करैः सह संसदि
दण्डदानात् प्रीतिमांश्च मार्गश्चास्तु सुखप्रदः।

तत्सत्० आत्मनः कायिकवाचिकमानसिकपापनिवारणार्थं मुक्तिप्राप्त्यर्थं० अमरनाथयात्रासाख्यर्थं तृणपादुका, उपानत्, यष्टिः, ददानि ३।

अथ बहुरूपगर्भस्तोत्रम्।

ॐ स्वच्छन्दभैरवाय नमः। ब्रह्मादिकारणातीतं स्वशक्त्यानन्दनिर्भरम्। नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥१॥ ॐत्रिपञ्चनयनं देवं जटामुकुटमण्डितम्। चन्द्रकोटिप्रतीकाशं चन्द्रार्धकृतशेखरम् ॥२॥ पञ्चवक्त्रं विशालाक्षं सर्पगोनासमण्डितम्। वृश्चिकैरग्निवर्णाभैर्हारेण तु विराजितम् ॥३॥ कपालमालाभरणं खड्गखेटकधारिणम्। पाशाङ्कुशधरं देवं शरहस्तं पिनाकिनम् ॥४॥ वरदाऽभयहस्तं च मुण्डखट्वाङ्गधारिणम्। वीणाडमरूहस्तं च घण्टाहस्तं त्रिशूलिनम् ॥५॥ वज्रदण्डकृताटोपं परश्वायुधहस्तकम्। मुद्गरेण विचित्रेण धृतेन तु विराजितम् ।६। सिंहचर्मपरीधानं गजचर्मोत्तरीयकम्। अष्टादशभुजं देवं नीलकण्ठं सुतेजसम् ॥७॥ ऊर्ध्ववक्त्रं महेशानि स्फटिकाभं विचिन्तयेत्। आपीतं पूर्ववक्त्रं तु नीलोत्पलदलप्रभम् ॥८॥ दक्षिणं तु विजानीयाद्वामं चैव विचिन्तयेत्। दाडिमीकुसुमप्रख्यं कुङ्कुमोदकसन्निभम् ॥९॥ चन्द्रार्बुदप्रतीकाशं पश्चिमं तु विचिन्तयेत्। स्वच्छन्दभैरवं देवं सर्वकामफलप्रदम् ॥१०॥ ध्यायेद्वै यस्तु युक्तात्मा क्षिप्रं सिद्ध्यति मानवः। पूर्वं या सा मया ख्याता ह्यघोरा शक्तिरुत्तमा ॥११॥ यादृशं भैरवं रूपं तस्यास्तादृशमेव हि। भैरवं पूजयित्वा तु तस्योत्सङ्गगतां स्मरेत् ॥१२॥ ईषत्करालवदनां गम्भीरविपुलस्वनाम्। प्रसन्नास्यां सदा ध्यायेत् भैरवीं विस्मितेक्षणाम् सौम्यहं तां परब्रह्ममहिषीं चित्स्वरूपिणीम्। ब्रह्मादिकारणातीतां परानन्दमयीं शिवाम् ।१३। चन्द्रकोटिसमानाभं चन्द्रमौलिं जटाधरं। वराभयत्रिशूलासिकरं कामेश्वरं भजे।१४। विश्वातीतं विश्वमयं भैरवाष्टकसंयुतम्। सकलं निष्कलं शान्तं वन्दे स्वछन्द भैरवम ॥१५॥ सुशान्तं निष्कलं

शुद्धं सर्वव्यापि निरञ्जनं । चिद्वैधानन्दगहनं तेजः सर्वाश्रयं भजे ।१६। कैलास-शिखरासीनं देवदेवं जगद्गुरुम् । पप्रच्छ प्रणता देवी भैरवं विगतामयम् ॥१७॥ "श्रीदेव्युवाच" प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च । महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ॥१८॥ च्छिद्रस्थानेषु सर्वेषु सदुपायं वद प्रभो । येनायासेन रहितो निर्दोषश्च भवेन्नरः ।१६। "श्रीभैरवःउवाच" शृणु देवी परं गुह्यं रहस्यं परमाद्भुतम् । सर्वपापप्रशमनं सर्वदुःखनिवारणम् ॥२०॥ प्रायश्चित्तेषु सर्वेषु तीव्रेष्वऽपि विमोचनम् । सर्वच्छिद्रापहरणं सर्वार्तिविनिवारकम् ॥२१॥ समयोल्लङ्घने घोरे जपादेव विमोचनम् । भोगमोक्षप्रदं देवि सर्वसिद्धिफलप्रदम् ॥२२॥ शतजाप्येन शुद्ध्यंति महापातकिनोऽपि ये । तदऽर्धं पातकं हन्ति तत्पादेनोपपातकम् ॥२३॥ कायिकं वाचिकं चैव मानसं स्पर्शदोषजम् । प्रमादादिच्छया वाऽपि शतजाप्येन शुद्ध्यति ॥२४॥ यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः । श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महद् ॥२५॥ नित्ये नैमित्तिके काम्ये परस्याप्याऽऽत्मनोऽपि वा निश्छिद्रकरणं प्रोक्तं स्वभावपरिपूरणम् ।२६। द्रव्यहीने मन्त्रहीने यज्ञयोगविवर्जिते भक्तिश्रद्धाविरहिते शुद्धिशून्ये विशेषतः ॥२७॥ मनोविक्षेपदोषे च विलोपे पशुवीक्षिते । विधिहीने प्रमादे च जप्तव्यं सर्वकर्मसु ॥२८। नाऽतः परतरो मन्त्रो नातः परतरा स्तुतिः । नातः परतरा काचित्सम्यक्प्रत्यङ्गिरा प्रिये ॥२६॥ इयं समयविद्यानां राजराजेश्वरीश्वरि । परमाऽप्यायनं देवि भैरवस्य प्रकीर्तितम् ॥३०॥ प्रीणनं सर्वदेवानां सर्वसौभाग्यवर्धनम् । स्तवराजमिमं पुण्यं शृणुष्वाऽवहिता प्रिये ।३१। ("अस्य श्रीबहुरूपभट्टारकस्तोत्रस्य, श्रीवामदेव ऋषिः, अनुष्टुपछन्दः, श्रीबहुरूपभट्टारको देवता, आत्मनो० चतुर्वर्गसिद्ध्यर्थे पाठे विनियोगः अथ न्यासः । अघोरेभ्यः सर्वात्मने हृदय (अङ्गुष्ठा) अथ घोरेभ्यो ब्रह्म शिर० (तर्जनी) घोरघोरतरेभ्यश्च ज्वलिन्यै शिखा० (मध्यमा) सर्वतः शर्व सर्वेभ्यः पिङ्गलाय कवचाय० (अनामिका०) ॐ जुं सः ज्योतीरूपाय नेत्राभ्यां (कनिष्ठ) नमस्ते रुद्ररूपेभ्यो दुर्मेधाय महापाशुपतास्त्राय अस्त्राय फट् (करतल) नमः । मूलमन्त्रेण प्राणायामः । अथ ध्यानम् ।") वामे खेटकपाशशार्ङ्ग विलसद्दण्डं च वीणाघटिके बिभ्राणं ध्वजमुद्गरौ स्वनिभदे व्यङ्कं कुठारं करे । दक्षेस्यऽङ्कुशकन्दलेपुडमरूल्वज्रत्रिशूलाभयान्युद्रस्थं शरवक्त्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः । ॐ बहुरूपाय विद्महे कोटराक्षाय धीमहि । तन्नोऽघोरः प्रचोदयात् ।३। (मूलं । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च सर्वतः शर्व सर्वेभ्यो

नमस्ते रुद्ररूपेभ्यः'') १०८, ॐ श्रीभैरवः । ॐनमः परमाकाशशायिने परमा-
त्मने । शिवाय परसंशान्तनिरानन्दपदाय ते ।१। अवाच्यायाऽप्रमेयाय प्रमात्रे
विश्वहेतवे । महासामान्यरूपाय सत्तमात्रैकरूपिणे ।२। घोषादिदशधाशब्दबीज-
भूताय शम्भवे । नमः शान्तोग्रघोरादिमन्त्रसन्दर्भगर्भिणे ।३। रेवतीसङ्गविस्र-
म्भसमाश्लेषविलासिने । नमः समरसास्वादपरानन्दोपभोगिने ।४। भोगपाणे
नमस्तुभ्यं योगीशैः पूजितात्मने । द्वयनिर्दलनोद्योगसमुल्लासितमूर्तये ।५। थुरत्प्र-
सरविक्षोभविसृष्टाऽखिलजन्तवे । नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ।६।
घोरसंसारसंभोगदायिने स्थितिकारिणे । कालादिक्षितिपर्यन्तपालिने विभवे नमः
।।७।। रेहनाय महामोहध्वान्तविध्वंसहेतवे । हृदयाम्भोजसंकोचभेदिने शिवभा-
नवे ।।८।। भोगमोक्षफलप्राप्तिहेतुयोगविधायिने । नमः परमनिर्वाणदायिने चन्द्र
मौलये ।।९।। घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्तये । नमः शर्वाय सर्वाय
सर्वपाशापहारिणे ।।१० रवणाय रवान्ताय नमस्ते रावराविणे । नित्याय सुप्र-
बुद्धाय सर्वान्तरतमाय ते ।।११।। घोषाय पुरनादान्तश्चराय खचराय ते । नमो
वाक्पतये तुभ्यं भवाय भवभेदिने ।।१२।। रमणाय रतीशाङ्गदाहिने चित्रकर्मिणे ।
नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ।।१३।। तमः पारप्रतिष्ठाय सर्वान्तपद-
गाय ते । नमः समस्ततत्वाध्वव्यापिने चित्स्वरूपिणे ।।१४।। रेवद्वराय रुद्राय
नमस्ते रूपरूपिणे । परापरपरिस्पन्दमन्दिराय नमो नमः ।।१५।। भरिताखिल-
विश्वाय योगगम्याय योगिने । नमः सर्वेश्वरेशाय महाहंसाय शम्भवे ।।१६।।
चर्च्याय चर्चनीयाय चर्चकाय चराय ते । रवीन्दुसन्धिसंस्थाय महाचक्रेश-
ते नमः ।।१७।। सर्वानुस्यूतरूपाय सर्वाच्छादकशक्तये । सर्वभक्षाय सर्वाय
नमस्ते सर्ववेदिने ।।१८।। रम्याय वल्लभाक्रान्तदेहार्धाय विनोदिने । नमः प्रपन्न-
दुष्प्राप्यसौभाग्यफलदायिने ।।१९।। तन्महेशाय तत्त्वार्थवेदिने भववेदिने । महा
भैरवनाथाय भक्तिगम्याय ते नमः ।।२०।। शक्तिगर्भप्रबोधाय शरण्यायाशरी-
रिणे । शान्तिपुष्ट्यादिसाध्यार्थसाधकाय नमोऽस्तु ते ।।२१।। रवत्कुण्डलिनीग-

(१२०)

उत्स्फोटनापटुप्रौढपरमाक्षरमूर्तये ॥२२॥

भैप्रबोधप्राप्तशक्तये ॥२२॥ समस्तव्यस्तसंप्रस्तरश्मिजालोदरात्मने । नमस्तुभ्यं
महावीर्यरूपिणे विश्वगर्भिणे ॥२३॥ रेवारणिसमुद्भूतवह्निज्वालावभासिने । घनी
भूतविकल्पात्मविश्वबन्धविलापिने ।२४। भोगिनीस्यन्दनारूढिप्रौढिमालब्धगर्विणे ।
नमस्ते सर्वभक्ष्याय परमामृतलाभिने ॥२५॥ नक्रकोटिसमावेशभरिताखिलसृष्टये ।
नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ।२६। महामोहमलाक्रान्तजीववर्गविबोधिने ।
महेश्वराय जगतां नमोऽकारणबन्धवे ।२७। स्तेनोन्मूलनदक्षैकस्मृतये विश्वमूर्तये ।
नमस्तेऽस्तु महादेवनाम्ने परसुधात्मने ।२८। रुद्राविणे महावीर्यरुरुवंशविना-
शिने । रुद्राय द्रावितशेषबन्धनाय नमोनमः ।२९। द्रवत्पररसास्वादचर्वणोद्युक्त-
शक्तये । नमस्त्रिदशपूज्याय सर्वकारणहेतवे ।३०। रूपातीत नमस्तुभ्यं नमस्ते
बहुरूपिणे । त्र्यम्बकाय त्रिधामान्तश्चारिणे चित्रचक्षुषे ।३१। पेशलोपायलभ्याय
भक्तिभाजां महात्मनाम् । दुर्लभाय मलाक्रान्तचेतसां तु नमोनमः ।३२। भय-
प्रदाय दुष्टानां भवाय भवभेदिने । भव्यानां तन्मयानां तु सर्वदाय नमो-
नमः ।३३। अणूनां मुक्तये घोरघोरसंसारदायिने । घोरातिघोरमूढानां तिरस्कर्त्रे
नमोनमः ।३४। सर्वकारणकलापकल्पितोल्लासिसंकलसमाधिविष्टराम् । हार्द-
कोकनदसंस्थितामपि तां प्रणौमि शिववल्लभामजाम् ॥ सर्वजन्तुहृदयाब्जमण्डलो
द्भूतभावमधुपानलम्पटाम् । वर्ण भेद विभवान्तरस्थितां तां प्रणौमि शिववल्ल-
भामजाम् ॥ इत्येवं स्तोत्रराजेशं महाभैरवभाषितम् ॥ योगिनीनां परं सारं न
दद्याद्यस्य कस्यचित् ॥ अदीक्षिते शठे क्रूरे निःसत्ये शुचिवर्जिते । नास्तिके
च खले मूर्खे प्रमत्ते विलुतेऽलसे ॥ गुरुशास्त्रसदाचारदूषके कलहप्रिये ।
निन्दके चुम्भके क्षुद्रेऽसमयज्ञे च दाम्भिके ॥ दाक्षिण्यरहिते पापे धर्महीने च
गर्विते । भक्तियुक्ते प्रदातव्यं न देयं परदीक्षिते ॥ पशूनां सन्निधौ देवि !
नोच्चार्यं सर्वथा क्वचित् । अस्यैव स्मृतमात्रस्य विघ्ना नश्यन्ति सर्वशः ।
गुह्यका यातुधानाश्च वेताला राक्षसादयः । डाकिन्यश्च पिशाचाश्च क्रूरसत्वाश्च
पूतनाः ॥ नश्यन्ति सर्वे पठितस्तोत्रस्यास्य प्रभावतः । खेचरी भूचरी चैव
डाकिनी शाकिनी तथा ॥ ये चान्ये बहुधा भूता दुष्टसत्त्वा भयानकाः ।
व्याधिदौर्भिक्षदौर्भाग्यमारीमोहविषादयः ॥ गजव्याघ्रादयो भीताः पलायन्ते

दिशो दश। सर्वे दुष्टाः प्रणश्यन्ति चेत्याज्ञा पारमेश्वरी।। चन्द्राङ्कं युग्मपादं शितिगलमुदधिं श्रीमुखं विश्ववर्णं, षट्स्कन्धं सूर्यबाहुं दिनकरकमलं शून्यषट्वह्निपूर्वम्। पादाभ्यां माररुद्रौ रविशशिहुतभुकमण्डलैर्भ्राम्यमानं, लीलाक्रान्तान्तमेकं त्रिभयभयहरं कालचक्रं नमामि।। नमस्तस्मै ह्यघोराय घोरघोरतरात्मने। उत्पतिस्थितिसंहारलयानुग्रहहेतवे।। इति श्रीललितस्वच्छन्दे बहुरूपगर्भस्तोत्रराजः सम्पूर्णः।।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः।।

विश्व का कल्याण हो ॥

शुद्धि पत्र

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
सइ	इस	२ (दो शब्द)	१०
औार	ओर	३	१०
पृष्ठ्याः	पृथिव्याः	४	१२
अपनी	अपने	४	२१
प्रथपृष्ठ	प्रथमपृष्ठ	१६	१०
दिवकीकार	दिवकीयार	१८	२१
Sonl	Soul	२४	१८
त्रिशूलपाणि पापारि! भर्गरूप शिवापते। निवारय०		३७	२७
(यह लाइन पिछली लाइन से पहले पढनी चाहिए)		,,	,,
में	के	४०	२१

कुवन्ते	कुर्वन्ते	४३	२
प्रएम्य	प्रणम्य	४३	८
अनुतर	अनुत्तर	४६	१७
कामकः	कामुकः	४८	२३
स्त्री	स्त्री	५०	५
है	हे	५०	१७
आधुना	अधुना	५१	६
श्रतश्च	श्रुतश्च	६४	२५
गविर्तः	गर्वितः	७०	१७
तुष्टुवु	तुष्टुवुः	७१	६
देवेशाः	देवेशाः	७२	११
वायुरूपवाली	वायुरूप	७७	५
स्मरामनुत्तमं	स्मारमनुत्तमं	६६	१६
ध्रवा	ध्रुवा	१०५	१५
ज्वं	जुं	१०६	२४
तिष्ठन्त	तिष्ठन्तु	१०७	२
पडना	पढना	१०७	३
चण्डेश्वराय	चण्डीश्वराय	१०६	११
जयोपेन्द्र	जयोपेन्द्रेद्र	११०	४
अञ्जलिमिमं	अञ्जलिमिमां	१११	१२
उपानहं	उपानदहं	११६	२६
साख्यर्थं	साक्ष्यर्थं	११७	७
विस्त्रन्भ	विस्त्रम्भ	११६	५
परमेप्टिने	परमेष्ठिने	११६	७

छडी इत्यादि अन्य कतिपय विषयों पर अभी पूर्ण अनुसंधान संभव न हो सका, अतः उन्हें अगले संस्करणों में प्रकाशित किया जायेगा।

Printed at :
THE FINE ART PRESS,
2nd Bridge, Srinagar,
Kashmir.